विद्या नाम नरस्य रूपम् अधिकम् (वर्धति)। (सा) (तस्य) प्रच्छन्नगुप्तम् धनम् (अस्ति)। विद्या भोगकरी, यशःसुखकरी, गुरूणाम् गुरुः (भवति)। विदेशगमने विद्या बन्धुजनः (अस्ति)। विद्या परा दैवता (भवति)। विद्या राजसु पूज्यते, न हि धनम् । विद्याविहीनः पशुः (भवति)॥

Knowledge increases a man's personality. It is his secret, hidden treasure. It generates all pleasures, fame and happiness. It is the teacher of all teachers. It is like a dear friend in foreign land. Education is the supreme Goddess. All kings honour knowledge, not wealth. Without proper education, one is as good as an animal.

विद्या- Education, knowledge, भोगकरी- one that causes enjoyment- भोगः -enjoyment, fruition, करी, करम्, करः- who or what causes- भोगम् कारयति इति- उपपद तत्पुरुष स. , यशःसुखकरी- one that helps to achieve fame and happiness -यशस्- fame, glory, सुखम्- happiness- यशः च सुखम् च- यशःसुखम् -द्वंद्व स.- यशःसुखे कारयत: इति- उपपद तत्पुरुष स., परा- (परः, परम्)- supreme, ultimate, दैवता (दैवतः, दैवतम्)- deity, divinity, God- all in स्त्री. लिं. प्र. वि. ए. व., नाम (नामन्)- an, appellation, a name, रूपम्- figure, look, appearance, अधिकम्- added, excessive, additional, प्रच्छन्नगुप्तम्- secret hidden- प्रच्छन्न- covered, hidden- क. भू. धा. वि. of प्र + छद्-(छद्- १ &१० ग. उ. प.- छदति-ते & छादयति-ते), गुप्तम्- secret, unknown, प्रच्छन्नं च गुप्तं च- द्वंद्व स. धनम्- wealth, money- all in- न. लिं. प्र. वि. ए. व., प्रच्छन्नगुप्तम् धनम्- कर्मधारय स. नरस्य- पु. लिं. ष. वि. ए. व. of नर-a man, person, गुरूणाम्- पु. लिं. ष. वि. ब. व. of गुरु- teacher, guide, गुरुः- teacher, बन्धुजनः- well-wishing person, बन्धु- brother, friend, जन- person- बन्धुः इव जनः - कर्मधारय स ., विद्याविहीनः- one who is devoid of Education- {विहीन- devoid of- क. भू. धा. वि. of वि+हा (हा-

जहाति- २ ग. प. प. to leave, abandon)- विद्यया विहीनः - तृ. तत्पुरुष स.) & पशुः- animal- all in पु. लिं. प्र. वि. ए. व., विदेशगमने- न. लिं. स. वि. ए. व. of विदेशगमन- going to a foreign land- (विदेश- foreign land- विभिन्नः देशः- कर्मधारय स . गमन- going- विदेशे गमनम्- स. तत्पुरुष स.), न हि-अव्यय-not even, राजसु- among kings- पु. लिं. स. वि. ब. व. राजन्, पूज्यते- gets honoured- कर्मणि प्र. पु. ए. व. of पूज्- पूजयति-ते १० ग. उ. प. to honour, worship.

**क्षान्तिश्चेत्कवचेन किं, किमरिभिः क्रोधोऽस्ति चेद्देहिनां**
**ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम्।**
**किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि**
**व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम्॥२१॥**

(यदि) क्षान्तिः (अस्ति) चेद् कवचेन किम्? (यदि) देहिनाम् क्रोधः अस्ति चेद् अरिभिः किम्? (यदि) ज्ञातिः (अस्ति) चेद् अनलेन किम्? यदि सुहृद् (अस्ति) दिव्यौषधैः किं फलम्? यदि दुर्जनाः (सन्ति) सर्पैः किम्? यदि अनवद्या विद्या (अस्ति) किमु धनैः? (यदि) व्रीडा (अस्ति) चेद् किमु भूषणैः? यदि सुकविता अस्ति (चेद्) राज्येन किम्?

If one can forgive, what is the need for armour? If living beings are angry, who needs enemies? In a joint family, what is the need for (a separate) fire (kitchen)? If one has a good hearted friend, why look for divine medicines? With wicked persons around, why worry about snakes? What is the use of wealth, if one has faultless education (knowledge)? If one is modest, why wear other ornaments? With beautiful poetry (available), who needs a kingdom?

क्षान्तिः- forbearance, patience, forgiveness, विद्या- knowledge, education, अनवद्या- faultless, irreproachable (अनवद्य-adjctv- अन्+ अवद्य- नञ्तत्पुरुष स. -अवद्य- faulty, defective), व्रीडा- modesty, bashfulness & सुकविता- good poetry- सु-अव्यय- prefix implies; good, well, healthy- all in स्त्री. लि. प्र. वि. ए. व.,चेद्- अव्यय- if, provided that, although, कवचेन, अनलेन & राज्येन -तृ. वि. ए. व. of कवच-पु/न. लिं- armour, coat of mail, अनल-पु. लिं- fire, राज्य- न. लिं- kingdom, किम्- this neutral question word is used with तृतीया विभक्ति 'what is the use

of'. अरिभिः, दिव्यौषधैः, सर्पैः, धनैः & भूषणैः - all in तृ. वि. ब. व. of अरि-पु. लिं- enemy, foe, दिव्यौषध-पु/न. लिं.- Divine medicine- दिव्य- divine, wonderful, औषधम्- medicine- दिव्यम् औषधम्- कर्मधारय स., सर्प- पु. लिं.- snake, serpent, धन- न. लिं- wealth, money & भूषण- न. लिं- ornament, adornment, क्रोधः- anger, wrath, ज्ञातिः- kinsman, relation, सुहृद्- a friend, kind hearted-all in पु. लि. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्-२ ग. प. प. -to exist, to be, देहिनाम्- पु. लिं. ष. वि. ब. व. of देहिन्- living being, man, यदि-अव्यय- if, in case, फलम्- fruit, result, use- न. लि. प्र. वि. ए. व., दुर्जनाः-पु. लि. प्र. वि. ब. व. of दुर्जन- wicked person- दुष्टः जनः- कर्मधारय स., किमु (किम्+उ)- why indeed, whether-or,

**दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने**
**प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम्।**
**शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः॥२२॥**

ये पुरुषाः एवम् कलासु कुशलाः (सन्ति), तेषु एव च लोकस्थितिः (भवति) - स्वजने दाक्षिण्यम्, परिजने दया, दुर्जने सदा शाठ्यम्, साधुजने प्रीतिः, नृपजने नयः, विद्वज्जने च आर्जवम्, शत्रुजने शौर्यम्, गुरुजने क्षमा, कान्ताजने धृष्टता (इति)॥

The existence of this world indeed depends upon those men who are generous towards their own people, compassionate towards others, always deceitful towards the wicked, affectionate towards the noble, prudent towards the rulers, respectful towards the learned, brave against their enemies, patient towards the teachers and tactful with loved ones.

स्वजने, परिजने, दुर्जने, साधुजने, नृपजने, विद्वज्जने, शत्रुजने, गुरुजने & कान्ताजने- all in पु. लिं. स. वि. ए. व. of स्वजन- own people, relatives- (स्व- own, self- स्वस्य जनः), परिजन- servants, followers- (परि- अव्यय- prefix to noun means, roundabout, surrounded by), दुर्जन- wicked people- (दुष्टः जनः- प्रादि कर्मधारय स.), साधुजन- noble people-,नृपजन- royal

people, rulers- (नृन् पाति इति- नृपः- उपपद तत्पुरुष) विद्वज्जन- scholar, learned, शत्रुजन- enemy गुरुजन- teachers, elders, कान्ताजन- women, ladies- (कान्त- adjctv- desired, loved- क. भू. धा. वि. of कम्- कामयते-१० ग. आ. प. to love- कान्ता- beloved woman- (साधुः जनः, कान्तः जनः, नृपः जनः, विद्वान् जनः, गुरुः जनः, शत्रुः जनः - all विशेषणपूर्वपदकर्मधारय स.), दाक्षिण्यम्- courtesy, politeness, शाठ्यम्- dishonesty, trickery, आर्जवम्- honesty, sincerity, शौर्यम्- bravery, valour, heroism- all in न. लिं. प्र. वि. ए. व., दया- compassion, kindness, mercy, प्रीतिः- love, affection, क्षमा- forbearance, forgiveness, धृष्टता- tactfulness, courage- (धृष्ट- क. भू. धा. वि. of धृष्- धृष्णोति ५ ग. प. प. to be courageous, confident) & लोकस्थितिः- existence of the world- लोकः/लोकम्- world, स्थितिः- existence- लोकस्य स्थितिः- लोकस्थितिः- ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., नयः- statesmanship, wisdom- in पु. लिं. प्र. वि. ए. व., पुरुषाः, कुशलाः & ये- all in पु. लिं. प्र. वि. ब. व. of पुरुष-man, person, कुशल- expert, well versed & यद्-who, कलासु- in स्त्री. लिं. स. वि. ब. व. of कला- art, technique, तेषु- पु. लिं. स. वि. ब. व. of तद्-he, सदा- always, daily, च- and, एवम्- thus, in this manner, एव- just, mere, only- all अव्ययs

**जाड्यं धियो हरति, सिञ्चति वाचि सत्यम्**
**मानोन्नतिं दिशति, पापमपाकरोति।**
**चेतः प्रसादयति, दिक्षु तनोति कीर्तिम्**
**सत्संगतिः कथय किं न करोति पुंसाम्॥२३॥**

(सत्संगतिः) धियः जाड्यम् हरति, वाचि सत्यम् सिञ्चति, मानोन्नतिम् दिशति, पापम् अपाकरोति, चेतः प्रसादयति, कीर्तिम् दिक्षु तनोति। कथय! सत्संगतिः पुंसाम् किम् न करोति ?

Company of noble people, takes away the laziness of mind, instills truth in speech, guides to boost (self) respect, removes sins, pleases the mind and spreads fame in all direction. (Now) tell me, what can it not do for men?

सत्संगतिः company of the noble- सत्- noble, good, संगति- company ( सताम् संगतिः - ष. तत्पुरुष स.), जाड्यम्- न. लि. laziness, apathy, सत्यम्- न.

लि. truth, पापम् - न. लि. sin, मानोन्नतिम्- elevation of respect (मानस्य उन्नतिः- ष. तत्पुरुष स.), चेतः (चेतस्) - न. लि. mind, कीर्तिम्-स्त्री. लिं. fame- all in द्वि. वि. ए. व., धियः -स्त्री. लिं. ष. वि. ए. व. of धी- mind, intellect, वाचि - स. वि. ए. व. of वाच्- स्त्री. लिं talk, words, हरति- हृ-१ ग. प. प. to take away, remove, सिञ्चति- सिच् -६ ग. उ. प. सिञ्चति-ते- to infuse, instil, sprinkle, दिशति-दिश् ६ ग. उ. प. दिशति-ते to show, direct, give, अपाकरोति- drive away, remove- कृ. ८ ग. उ. प. करोति-कुरुते- to do- अप आ +कृ- remove, प्रसादयति-pleases- सद्-१ ग. प. प. सीदति- to sit, recline, प्र+सद्- to be pleased (causal- प्रयोजक of सद्- सादयति-ते), दिक्षु- स. वि. ब. व. of दिश्-स्त्री. लिं. -direction, तनोति- तन् ८ ग. उ. प. तनोति-तनुते to stretch, extend, cover all in वर्त. तृ. पु. ए. व., कथय- आज्ञार्थ मध्यम पु. ए. व. of कथ्- कथयति-ते १० ग. उ. प. to tell, say, पुंसाम्- ष. वि. ब. व. of पुंस्- man, human- पु. लिं (पुमान् पुमांसौ पुमांसः), किम्-(pronominal adjctv) what, which. All verbs - प्र. पु. ए. व.

**जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।**
**नास्ति येषां यशःकाये जरामरणजं भयम् ॥२४॥**

सुकृतिनः रससिद्धाः कवीश्वराः, येषाम् यशःकाये जरामरणजम् भयम् न अस्ति, ते जयन्ति॥

The great poets who have composed tasteful poetry and in whose fame there is no fear of old age and death, are winners (in this life.)

सुकृतिनः, रससिद्धाः, कवीश्वराः & ते- all in पु. लिं. प्र. वि. ब. व. of सुकृतिन्- learned, mastered, रससिद्ध- accomplished composer (in 8 types of 'Rasa'), कवीश्वर- Master Poet- कवीनाम् ईश्वरः - ष. तत्पुरुष स. & तद् - he, she, it, येषाम्-whose- ष. वि. ब. व. of यद्- who, यशःकाये - स. वि. ए. व. of यशःकाय- body in the form of fame or glory-यशस् - success, काय- body ( यशस् एव कायः - अवधारण पूर्वपद कर्मधारय स.), जरा- aging, मरणम् -death- जरा च मरणम् च - जरामरणम्- द्वंद्व स., जरामरणयोः जायते -उपपद तत्पु. स., भयम् - fear, न-no, not, अस्ति - वर्त. प्र. पु. ए. व. of अस् २ ग. प. प. to be, जयन्ति- वर्त. तृ. पु. ब. व. of जि-जयति १ ग. प. प. to win, to be successful, conquer

**सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः**
**स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः।**
**आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं**
**तुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना॥२५ ॥**

विष्टपकष्टहारिणि हरौ तुष्टे, देहिना, सच्चरितः सूनुः, प्रियतमा सती, प्रसादोन्मुखः स्वामी, स्निग्धम् मित्रम्, अवञ्चकः परिजनः, निःक्लेशलेशम् मनः, रुचिरः आकारः, स्थिरः विभवः च विद्यावदातम् मुखं, सम्प्राप्यते॥

When the remover of the world's hardships, Lord Vishnu, is pleased, living beings are blessed with well behaved children, a loving wife with good character, an employer eager to help, an affectionate friend, honest servants, a calm stress-free mind, a beautiful figure, steady wealth and a face radiating with scholarship.

विष्टपकष्टहारिणि, हरौ & तुष्टे- all in पु. लिं. स. वि. ए. व. of विष्टपकष्टहारिन्- remover of the world's hardships- विष्टप- world, कष्ट- trouble, evil, bad, हारिन्- carrying, taking, seizing- विष्टपस्य कष्टम्- विष्टपकष्टम्- & विष्टपकष्टस्य हारिन् - विष्टपकष्टहारिन्- both ष. तत्पुरुष स., हरिः- Lord Vishnu & तुष्टः- pleased, satisfied, delighted- तुष्ट- क. भू. धा. वि. of तुष्- तुष्यति ४ ग. प. प. to be pleased, contented, देहिना- पु. लिं. तृ. वि. ए. व. of देहिन्- living being, a man, सूनुः- son, child, सच्चरितः- of good character- सत्- good, noble, चरित- behaviour- क. भू. धा. वि. of चर्- चरति १ ग. प. प. to walk, behave, स्वामी (स्वामिन्)- master, owner, प्रसादोन्मुखः- favourable nature, eager to help- प्रसाद- kindness, favour, उन्मुखः- adjctv- inclined, eager, waiting- प्रसादाय उन्मुखः- प्रसादोन्मुखः- चतुर्थी तत्पुरुष स., परिजनः- servants, followers- (परि- अव्यय- prefix to noun means, round about, surrounded by), अवञ्चकः- honest, trustworthy- वञ्चकः- a cheat, fraudulent- न वञ्चकः- अवञ्चकः- नञ् तत्पुरुष स., आकारः- form, figure, shape, रुचिरः- pleasing, beautiful, स्थिरः- steady, stable, विभवः- wealth, prosperity- all in पु. लिं. प्र. वि. ए. व., प्रियतमा- beloved, wife, & सती- virtuous, lady of good character- both in स्त्री. लिं. प्र. वि. ए. व., मित्रम्- friend, स्निग्धम्- affectionate, tender, मनः (मनस्)- mind, heard, निःक्लेशलेशम्- without a bit of anguish- निस्- अव्यय- devoid of, without, क्लेश- agony, anguish, worldly occupation, लेशम्- very small

quality, bit- क्लेशम् लेशम् - विशेषण उत्तरपद कर्मधारय स. & निर्गतम् क्लेशलेशम् - निःक्लेशलेशम्- विशेषण पूर्वपद कर्मधारय स., विद्यावदातम्- radiating with scholarship- विद्या- knowledge, scholarship, अवदातम्- polished, shining, meritorious- विद्यया अवदातम्- विद्यावदातम्- तृ. तत्पुरुष स., मुखम्-face, सम्प्राप्यते- कर्मणी प्रयोग सं+प्र+आप्- सम्प्राप्नोति- वर्त. प्र. पु. ए. व -gets, gets bestowed upon, च- and.

**प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं**
**काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।**
**तृष्णास्रोतो विभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा**
**सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥२६॥**

एषः सामान्यः अनुपहतविधिः सर्वशास्त्रेषु श्रेयसाम् पन्थाः (अस्ति)॥ प्राणाघातात् निवृत्तिः, परधनहरणे संयमः, सत्यवाक्यम्, शक्त्या काले प्रदानम्, परेषाम् युवति-जन- कथा-मूकभावः, तृष्णास्रोतः विभङ्गः, गुरुषु विनयः, सर्वभूतानुकम्पा च॥

Following is the right way for successful life, well prescribed in all the scriptures.

"Avoiding killing living beings, control from stealing wealth of others, truthfulness in speech, offering help in times of need, keeping silent about stories about somebody else's women, stopping the torrent of greed within, politeness towards teachers and compassion towards all living beings."

प्राणाघातात्- पु. लिं. पं. वि. ए. व. of प्राणाघातः- killing of life - प्राणः- life, breath of life, आघातः- striking, killing- प्राणस्य आघात:- प्राणाघातः- ष. तत्पुरुष स., निवृत्तिः- aversion, absenteeism, desisting from & सर्वभूतानुकम्पा- compassion towards all living beings a सर्व- all, entire, भूत- living being, अनुकम्पा- compassion, pity- सर्वाणि भूतानि - सर्वभूतानि- विशेषणपूर्वपदकर्मधारय स. & सर्वभूतेभ्य: अनुकम्पा- सर्वभूतानुकम्पा- च. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., परधनहरणे- न. लिं. स. वि. ए. व. of परधनहरणम्- stealing of wealth of others- पर- other, धन- wealth, money, हरणम्- seizing, stealing- परस्य धनम्- परधनम् & परधनस्य हरणम्- परधनहरणम्- both ष. तत्पुरुष स., युवतिजनकथामूकभावः- Silence towards

stories about women- युवति- young lady, जन- folk, people, कथा- story, talk, मूक- silence- भावः- attitude- युवतिः जनः- युवतिजनः- कर्मधारय स., युवतिजनस्य कथा- युवतिजनकथा- ष. तत्पुरुष स., मूकः भावः- मूकभावः- कर्मधारय स., युवतिजनकथाभ्यः मूकभावः- युवतिजनकथामूकभावः- चतुर्थी तत्पुरुष स., संयमः- control, restraint, विभङ्गः- breaking, stoppage, विनयः- discipline, decorum polite conduct, अनुपहतविधिः- well prescribed practice- सामान्यः- common, general- अनुपहत- adjctv- not injured, unbleached, well prescribed- न उपहत- अनुपहत- नञ् तत्पुरुष स.- उपहत- affected, injured- क. भू. धा. वि. of उप+ हन्- (हन्- हन्ति- २ ग. प. प. to kill), विधिः- rule, practice- अनुपहतः विधिः- अनुपहतविधिः- विशेषणपूर्वपदकर्मधारय स., पन्थाः- (पथिन्)- way, road & एषः (एतद्)- this, he- all in पु. लिं. प्र. वि. ए. व., सत्यवाक्यम्- truthfulness in talk- सत्य- adjctv- true, honest, genuine, वाक्यम्- sentence, speech - सत्यम् वाक्यम्- सत्यवाक्यम्- विशेषणपूर्वपद- कर्मधारय स., तृष्णास्रोतः- flow of greediness, a torrent of greed- तृष्णा- स्त्री. लिं.- greed, thirst, स्रोतः (स्रोतस्)- stream, torrent- तृष्णायाः स्रोतः- तृष्णास्रोतः- ष. तत्पुरुष स. & प्रदानम्- giving, offering- all in न. लिं. प्र. वि. ए. व., शक्त्या- स्त्री. लिं. तृ. वि. ए. व. of शक्तिः- capacity, strength, काले- पु. लिं. स. वि. ए. व. of कालः- time, परेषाम् & श्रेयसाम्- both in पु. लिं. ष. वि. ब. व. of पर- other & श्रेयस्- righteous deed, religious merit, गुरुषु- in पु. लिं. स. वि. ब. व. of गुरुः- elder, teacher, father, सर्वशास्त्रेषु- in न. लिं. स. वि. ब. व. of सर्वशास्त्रम्- all scriptures, treatises- सर्व- all, entire, शास्त्रम्- scriptures, treatises- सर्वम् शास्त्रम्- सर्वशास्त्रम्- विशेषणपूर्वपदकर्मधारय स., च-and- अव्यय

**प्रारभ्यते न खलु विघ्नभयेन नीचैः**
**प्रारभ्य विघ्नविहिता विरमन्ति मध्याः।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः**
**प्रारभ्य च उत्तमजनाः न परित्यजन्ति॥२७॥**

नीचैः विघ्नभयेन (कार्यम्) न खलु प्रारभ्यते। मध्याः (कार्यम्) प्रारभ्य विघ्नविहिताः विरमन्ति। उत्तमजनाः विघ्नैः पुनर् पुनर् अपि प्रतिहन्यमानाः, (कार्यम्) प्रारभ्य च न परित्यजन्ति॥

Low aiming people do not start (the work) due to the fear of difficulties. Average people start (the work) but leave it half way, when faced with difficulties. But the great people, after starting the work, do not leave it, despite facing difficulties again and again.

नीचैः & विघ्नैः- both तृ. वि. ब. व. of नीच-small, low, dwarfish & विघ्न-difficulty, trouble, विघ्नभयेन- तृ. वि. ए. व. of विघ्नभयम्- विघ्न- obstacle, difficulty, भय- fear - विघ्नस्य भयम्- विघ्नभयम्- ष. तत्पुरुष स., खलु -अव्यय-surely, truly, प्रारभ्यते- कर्मणि प्रयोग. प्र+आ+रभ् ( रभ्-रभते १ ग. आ.प. to begin, set), मध्याः & विघ्नविहिताः- both प्र. वि. ब. व. of मध्य - middle, average, & विघ्नविहित- विघ्नेन विहितः - तृ. तत्पुरुष स. विहित- faced, disturbed, approached -क. भू. धा. वि. of वि+हि (हि -हिनोति ५ ग. प. प. to impel, cast, promote), विरमन्ति- प्र. पु. ब. व. of वि+रम्- १.प.प. (to rest, stop (रम्-रमते-१ ग. आ. प. to be delighted, to rejoice), उत्तमजनाः & प्रतिहन्यमानाः -प्र. वि. ब. व. of उत्तमजन- उत्तमः जनः - good people वि.पु.प.कर्मधारय स. & प्रतिहन्यमान - प्रति- अव्यय-prefix to verb means upon,, against, हन्यमान- killed, attached- कर्तरि वर्त. धा. सा. वि. of हन्-हन्ति - २ ग. प. प. to kill, strike, पुनर् -again, once again & अपि-also, even - both अव्यय- परित्यजन्ति- प्र. पु. ब. व. of परि+त्यज्- १ ग. प. प. to leave, quit

**असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः**
**प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्।**
**विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां सतां**
**केनोद्दिष्टं विषममसिधाराव्रतमिदम्॥२८॥**

सताम् इदम्, विषमम् असि-धारा व्रतम्, केन उद्दिष्टम्?

असन्तः न अभ्यर्थ्याः। कृशधनः सुहृद् अपि न याच्यः। प्रिया न्याय्या वृत्तिः। असुभङ्गे अपि मलिनम् असुकरम्। विपदि उच्चैः स्थेयम्। महतां च पदम् अनुविधेयम् (इति)॥

Who stipulated this following difficult vow for the good people, like walking on the edge of a sword?

"Do not seek anything from the wicked people. Do not approach a financially weak friend. Keep one's conduct fair and likeable. Do not

indulge in dirty deeds even in life-threatening moments. Keep your head high while facing calamity. Follow the path of noble people."

*The answer is that these are the inborn qualities of good people; they are not imposed on them.*

असन्तः & अभ्यर्थ्याः- both in पु. लिं. प्र. वि. ब. व. of असत्- a bad person, wicked man - सत्- noble, respectable- न सत्- नञ्तत्पुरुष स. & अभ्यर्थ्यः- one who is to be asked or sought for- अभ्यर्थ्य (also अभ्यर्थयनीय & अभ्यर्थयितव्य)- क. वि. धा. सा. वि. of अभि+ अर्थ्- to beg earnestly- (अर्थ्- अर्थयते १० ग. आ. प. to ask, beg), कृशधनः-a poor person, one with weak finance- कृश- adjctv- weak, lean, धनम्- wealth, riches- धनः- one who has wealth- कृशः धनः- वि. पू. प. कर्मधारय स., सुहृद्- a friend, याच्यः- from whom one can seek- याच्य- (also याचनीयः & याचितव्यः)- क. वि. धा. सा. वि. of याच्- याचते १ ग. आ. प. to beg, ask- all in पु. लिं. प्र. वि. ए. व., प्रिया (प्रिय- adjctv)- desirable, likeable, न्याय्या- (न्याय्य- adjctv)- just, proper, fit, वृत्तिः- conduct, behavior- all in स्त्री. लिं. प्र. वि. ए. व., असुभङ्गे- in पु. लिं. स. वि. ए. व. of असुभङ्गः- loss of life, असुः- breath of life, भङ्गः- breaking, shattering, breach- असोः भङ्गः- ष. तत्पुरुष स., मलिनम्- dirty, sinful, wicked, असुकरम्- forbidden, not to be done- सुकर- adjctv- easy to be done, feasible- न सुकर- नञ्तत्पुरुष स., स्थेयम्- (स्थेय- adjctv)- to be determined, to stand by- स्थेय (also स्थातव्य & स्थानीय)- क. वि. धा. सा. वि. of स्था- तिष्ठति १ ग. प. प. to stay, stand, पदम्- position, status, अनुविधेयम्- to be followed, practiced- अनुविधेय- (also अनुविधेयनीय & अनुविधेयितव्य)- क. वि. धा. सा. वि. of नामधातु of विधिः- doing, performance, action- विधीयते- to do, act, - all in न. लिं. प्र. वि. ए. व., विपदि- in स्त्री. लिं. स. वि. ए. व. of विपद्- distress, calamity, misfortune, महताम् & सताम्- both in पु. लिं. ष. वि. ब. व. of महत्- adjctv- great, noble, highly placed & सत्- good, noble, इदम्- this, it, विषमम्- odd, difficult, painful, असिधाराव्रतम्- a vow that is like an edge of a sword - असिः- a sword, धारा- a sharp edge, व्रतम्- vowed observation, a vow- असेः धारा- ष. तत्पुरुष स. & असिधारा इव व्रतम्- उपमान. पू. प. कर्मधारय स., उद्दिष्टम्- prescribed, thought of- उद्दिष्ट- क. भू. धा. वि. of उद्+ इष्- to think of, prescribe- (इष्- इच्छति ६ ग. प. प. to

desire, want, केन- by whom- पु. लि. तृ. वि. ए. व. of किम्- who, अपि- also, even, न- no, not, च- and, उच्चैः- aloft, above- all अव्यय

# 3. मानशौर्यपद्धति – On Pride and Heroism

Bhartṛhari composed many verses about the ways of the proud and the brave people by giving examples of various animals.

A lion will never eat dry grass, even if he is emaciated with hunger and thinned down by old age. Persons seek their goals according to their pride and bravery even if they have to face many difficulties.

Whereas people without pride are like a dog that wags its tail and falls at the feet of the feeder, people with pride are like the elephants that eat only after being coaxed.

A strong person does not tolerate dishonesty by others.

**क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशाम्**
**आपन्नोऽपि विपन्नदीधिति अपि प्राणेषु नश्यत्स्वपि।**
**मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः**
**किं जीर्णतृणमत्ति मानमहतामग्रेसरः केसरी॥२९॥**

मत्त-इभेन्द्र-विभिन्न-कुम्भ-पिशित-ग्रास-एकबद्ध-स्पृहः, मान-महताम्-अग्रेसरः, केसरी, क्षुद्-क्षामः अपि, जरा-कृशः अपि, शिथिल-प्रायः अपि, कष्टां दशाम् आपन्नः अपि, विपन्नदीधितिः अपि, प्राणेषु नश्यत्सु अपि, किं जीर्णतृणम् अत्ति?

Will a lion, addicted to and longing for the flesh from the split forehead of the king of elephants in rut and the one for whom self prestige is of utmost importance, will ever eat dry grass, even if, he is emaciated with hunger, thinned down by the old age, feeling weak and is in a miserable state, has lost his energy and is dying?

मत्त-intoxicated, drunk-क.भू. धा. वि. of मद्-माद्यति ४ ग. प. प. to be drunk, mad or intoxicated, इभः - elephant- इभेन्द्र- king among elephants- इभेषु इन्द्रः -स. तत्पुरुष स., विभिन्न- क.भू. धा. वि. of वि+भिद्-

भिनत्ति-भिंत्ते ७ ग. उ. प. to break, split, कुम्भ-pitcher, the frontal globe on the forehead of the elephant, पिशित- flesh, ग्रास- mouthful, food, एकबद्ध- addicted, स्पृहः - desirous, yearning, मान- prestige-मानमहताम्-ष. वि. ब. व. of मानमहत्- मानः महत् यस्य सः -बहुव्रीहि स., अग्रेसरः-leader, foremost, केसरी-प्र. वि. ए. व. of केसरिन्- -पु. लिं.-lion, क्षुध्-(स्त्री. लिं. )- Hunger, क्षाम-adjctv-emaciated- क्षुधया क्षामः- तृ. तत्पुरुष स., अपि-अव्यय-even, though, जरा-old age, कृशः - thinned, emaciated- जरया कृशः - तृ. तत्पुरुष स., शिथिल- feeble, weak, प्रायः (प्रायस्)-अव्यय - mostly, generally, कष्टाम् & दशाम् -स्त्री. लिं. द्वि. वि. ए. व. of कष्टा-bad, difficult, दशा-state, time, आपन्न-afflicted, reduced to, arrived - क.भू. धा. वि. of आ+पद्- (पद्-पद्यते-४ ग. आ. प. to go, approach), विपन्न-lost, destroyed- क.भू. धा. वि. of वि+पद्, दीधितिः -bodily lustre, energy, प्राणेषु & नश्यत्सु -पु/न. लिं. स. वि. ब. व. of प्राण-life, breath & नश्यत्-वर्त. का. धा. सा. वि. of नश्-नश्यति ४ ग. प. प. to be lost, destroyed, किम् -whether, जीर्ण-adjctv-old, decayed, तृणम् -grass-जीर्णम् तृणम् - कर्मधारय स.- जीर्णतृणम् -न. लिं. द्वि. वि. ए. व., अत्ति- वर्त. प्र. पु. ए. व. of अद्-२ ग. प. प.

**स्वल्पस्नायुवसावसेकमलिनं निर्मांसमप्यस्थि गोः**
**श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये।**
**सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं**
**सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम्॥३०॥**

श्वा गोः स्वल्प-स्नायु-वसा-अवसेक-मलिनम् निर्मांसम् अस्थि अपि लब्ध्वा परितोषम् एति, न तु तत् तस्य क्षुधा-शान्तये (भवति) सिंहः अङ्कम् आगतम् जम्बुकम् अपि त्यक्त्वा द्विपम् निहन्ति।सर्वः जनः क्रुच्छ्र-गतः अपि सत्त्व-अनुरूपं फलम् वाञ्छति॥

A dog feels happy even if it gets a cow's fleshless bone, dirtied by bits of ligament and marrow. However, it does not satisfy its hunger. A lion kills an elephant rejecting the fox, which has landed on its lap. Persons seek fruits (their catch/ gains) according to their own status, even if they have to face difficulties.

श्वा- (श्वन्)- dog, सिंहः- lion, सर्वः- all, entire, जनः- people, क्रुच्छ्रगतः-one who faced difficulty, took effort- क्रुच्छ्र- adjctv- difficulty, hardship,

misery, गत- gone, undergone, faced- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go- all in पु. लिं. प्र. वि. ए. व.)- कृच्छ्रः गतः- कृच्छ्रगत- विशेषणपूर्वपद कर्मधारय स., गोः- पु/स्त्री. लिं. ष. वि. ए. व. of गो-cow or bull, स्वल्प- adjctv- little, small, स्नायु- ligament, वसा- marrow, आवसेक- पु. लिं.- sprinkling, मलिन- adjctv- soiled, dirtied, स्नायु च वसा च- स्नायुवसा- द्वंद्व स., स्वल्पम् स्नायुवसा- स्वल्पस्नायुवसा- विशेषणपूर्वपद कर्मधारय स., स्वल्पस्नायुवसायाः आवसेकः- स्वल्पस्नायुवसावसेकः- ष. तत्पुरुष स. & स्वल्पस्नायुवसावसेकेण मलिनम् -स्वल्पस्नायुवसावसेकमलिनम्- तृ. तत्पुरुष स.- devoid of flesh dirtied by bits of ligament and marrow, निर्मांसम्- without meat, flesh- निःशेषम् मांसम्- अव्यय पूर्वपद कर्मधारय स. (निर्- अव्यव- prefix to a word conveys sense of : without devoid of, free from), मांसम्- meat, flesh, अस्थि- न. लिं.-bone, परितोषम्- contentment, full satisfaction, परि- अव्यव- prefix to a word conveys sense of : full, complete, very much, अङ्कम्-पु/न. लिं- lap, spot, आगतम्- arrived, reached- क. भू. धा. वि. of आ+ गम् (गम्-गच्छति १ ग. प. प. to go), जम्बुकम्- jackal, fox, द्विपम्- elephant, द्विप - द्विवारं पिबति इति- उपपद तत्पु. स., फलम्- fruit, reward, result, सत्त्वानुरूपम्- according to own status- सत्त्व- capacity, vitality, substance, अनुरूपम्- resembling, like, according to- अनु- अव्यव- prefix to a word conveys sense of: like, imitation of, conformable to- all in- द्वि. वि. ए. व., अपि- अव्यव- also, and, even, लब्ध्वा- having got, received & त्यक्त्वा- rejecting, abandoning- both पू. का. वा. त्वान्त धा. सा. अव्यव of लभ्- लभते १ ग. आ. प. to get, acquire, gain & त्यज्- १ प. प. to leave, abandon, एति, वाञ्छति & निहन्ति- वर्त. प्र. पु. ए. व. of इ- २ ग. प. प. to go, come to, वाञ्छ्- १ ग. प. प. to long for, desire & नि+हन्- to kill, destroy- (हन्- हन्ति-२ ग. प. प. to kill), तु- अव्यव- but, and now, as regards, तद्- that, it, तस्य- his, its- ष. वि. ए. व. of तद्, क्षुधाशान्तये- स्त्री. लिं. स. वि. ए. व. of क्षुधाशान्ति- satisfy or quench the hunger- क्षुधा- स्त्री. लिं.- hunger, शान्ति- removal, ease, alleviation- क्षुधायाः शान्तिः - ष. तत्पुरुष स., न- no, not

**लाङ्गूलचालनमधश्चरणावपातं**
**भूमौ निपत्य वदनोदरदर्शनं च।**
**श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु**
**धीरं विलोकयति चाटुशतैश्च भुङ्ते॥३१॥**

श्वा पिण्डदस्य लाङ्गूल-चालनम्, अधः चरणावपातम्, भूमौ निपत्य, वदन-उदरदर्शनम् च कुरुते। गजपुङ्गवः तु (पिण्डग्रहण समये पिण्डदम्) धीरम् विलोकयति, चाटुशतैः च भुङ्ते॥

(At feeding time), a dog wags its tail, falls down to the feet (of the feeder), then after falling to the ground, shows its face and stomach to its feeder ( as if begging for food). While the head of elephants boldly looks at (its feeder) and eats only after coaxing hundreds of times.

श्वा & गजपुङ्गवः -पु. लिं. प्र. वि. ए. व. of श्वन्-dog & गजपुङ्गव - head of elephants-(गजानाम् पुङ्गवः - ष. तत्पुरुष स.), पिण्डदस्य- -पु. लिं. ष. वि. ए. व. of- पिण्डद- feeder, पिण्डम् ददाति इति -उपपद तत्पु स. पिण्डः or पिण्डम्-morsel, mouthful, लाङ्गूलचालनम्, चरणावपातम् & वदनोदरदर्शनम् -all द्वि. वि. ए. व. of लाङ्गूलचालन- wagging of tail-(लाङ्गूल-tail, चालन-movement-लाङ्गूलस्य चालनम्-ष. तत्पुरुष स.), चरणावपात-falling to feet -(चरण-foot, अवपात-falling down-चरणयोः अवपातम् -स. तत्पुरुष स.) & वदनोदरदर्शन- showing face and stomach- (वदन-face, mouth, उदर-stomach, दर्शन-showing-वदनम् च उदरम् च- वदनोदर -द्वंद्व स.- वदनोदरस्य दर्शनम्-ष. तत्पुरुष स.), धीरम्-अव्यय-boldly, steadily, firmly, courageously, च-and, भूमौ-स्त्री. लिं. स. वि. ए. व. of भूमिः -earth, ground, निपत्य-पू. का. वा. ल्यबन्त धा. सा. अव्यय of नि+पत्- to fall below (पत्-पतति १ ग. प. प. to fall), कुरुते & भुङ्ते-वर्त. प्र. पु. ए. व. of कृ-करोति-कुरुते ८ ग. उ. प. to do & भुज्- भुनक्ति-भुंक्ते ७ ग. उ. प. to eat, devour, विलोकयति-प्रयोजक वर्त. प्र. पु. ए. व. of वि+लोक्-to behold, see (लोक्-लोकते-१ ग. आ. प. to see), तु-अव्यय- instead, on the contrary, चाटुशतैः-न. लिं. तृ. वि. ब. व. of चाटुशत- coaxing hundreds of times-(चाटु-coaxing, sweet talk, शतम्-hundred, चाटुनाम् शतानि- ष. तत्पुरुष स. or शतानि चाटवः - द्विगु स )

**परिवर्तिनि संसारे मृतः को वा न जायते।**
**स जातो येन जातेन याति वंशः समुन्नतिम्॥३२॥**

कः मृतः,परिवर्तिनि संसारे, न वा जायते ? येन जातेन वंशः समुन्नतिम् याति, सः (एव) जातः॥

In this revolving life cycle, which dead person is not reborn again? (However), only that person is (truly) reborn by whose birth his family gets uplifted.

परिवर्तिनि & संसारे- both in पु. लि. स. वि. ए. व. of -परिवर्तिन्- ever-recurring, changing- (परि+ वृत्- to turn round, revolve- वृत्-वर्तते १ ग. आ. प. to be) & संसार- course of worldly life, कः, मृतः, वंशः, सः & जातः - all in पु. लिं. प्र. वि. ए. व. of किम्-who, मृत- dead- (क. भू. धा. वि. of मृ- म्रियते-मृत ६ ग. आ.प. to die), वंश- race, family, dynasty, तद्- he & जात- born, male offspring- (क. भू. धा. वि. of जन्- जायते- to be born) न- no, not, वा- अव्यय- or, जायते & याति- वर्त. प्र. पु. ए. व. जन् & या- २ ग. प. प. to go, to become, to last, येन- by whom & जातेन- by being born- both in- पु. लि. तृ. वि. ए. व. of यद्- who & जात- see above समुन्नतिम्- स्त्री. लिं. द्वि. वि. ए. व. of समुन्नति- eminence, rise

**कुसुमस्तबकस्य इव द्वयी वृत्तिः मनस्विनः।**
**मूर्ध्नि वा सर्वलोकस्य शीर्यते वने एव वा ॥३३॥**

मनस्विनः कुसुमस्तबकस्य इव द्वयी वृत्तिः(भवति)। सर्व-लोकस्य मूर्ध्नि वा(भवति), वने एव वा शीर्यते॥

Just like a bunch of flowers, a wise man has two positions. He/She is either a crown on everyone's head or is discarded (by them) to the forest.

मनस्विनः, कुसुमस्तबकस्य & सर्वलोकस्य- ष. वि. ए. व. of मनस्विन्- high-soiled, determined, wise, कुसुमस्तबक- bunch of flowers, कुसुमं- flower-स्तबक- bunch- कुसुमानाम् स्तबकम्-ष. तत्पुरुष स. & सर्वलोक - entire world, सर्वः लोकः - कर्मधारय स., इव-अव्यय-like, similar to, द्वयी - adjctv- a pair, two kinds of, & वृत्तिः- Both स्त्री. लिं. प्र. वि. ए. व nature, characteristic, मूर्ध्नि- (पु. लिं.) & वने (न. लिं. )- स. वि. ए. व. of मूर्धन्-head & वन -forest, शीर्यते -कर्मणि वर्त. तृ. पु. ए. व. of शॄ (दीर्घ)- शीर्णाति ९ ग. प. प. to wither, waste away, वा-or, and & एव-just, just so both अव्यय

**सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषाः**
**तान् प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते।**
**द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्करौ**
**भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः॥३४॥**
पा.भे.: भास्करौ = भास्वरौ

(हे) भ्रातः, पश्य बृहस्पतिप्रभृतयः पञ्चषाः सम्भाविताः, अन्ये अपि (ग्रहाः) सन्ति। (किन्तु) विशेषविक्रमरुची, शीर्षावशेषाकृतिः दानवपतिः एषः राहुः तान् प्रति न वैरायते। (सः) द्वौ भास्करौ/भास्वरौ, दिवाकरनिशाप्राणेश्वरौ एव पर्वणि ग्रसते॥

Oh Brother, look here, there are five or six big planets and others also. However, this Rahu, the lord of Demons, one with peculiar fancy for heroism and one who has only head as the entire body, does not show his enmity towards those planets. He eclipses only these two sources of brightness, the Sun and the Moon, on new-moon and full-moon day.

भ्रातः- in पु. लिं. सं. वि. ए. व. of भ्रातृ- brother, Dear, पश्य-in आज्ञार्थ म. पु. ए. व. of दृश्- पश्यति १ ग. प. प. to see, look at, बृहस्पतिप्रभृतयः, पञ्चषाः, सम्भाविताः & अन्ये- all in पु. लिं. प्र. वि. ब. व. of बृहस्पतिप्रभृतिः- Jupiter etc.- बृहस्पतिः- planet Jupiter प्रभृतिः- अव्यय- beginning with, from, ever since, पञ्चष- adjctv- five or six- पञ्चन्- five, षड्- six- पञ्च वा षड् वा., सम्भावितः- fit, suited, big enough, esteemed- सम्भावित- क. भू. धा. वि. of प्रयोजक of सं+ भू- सम्भावयति- ते cause to fancy, consider, honor- (भू- भवति १ ग. प. प. to be, to exist) & अन्यः- adjctv- other, another, सन्ति- in वर्त. प्र. पु. ब. व. of अस्- अस्ति २ ग. प. प. to be, to exist, विशेषविक्रमरुची- one having peculiar kind of fancy for heroism-विशेष- adjctv- peculiar, special, abundant, विक्रम- heroism, prowess, रुचिः- relish, taste, interest- विशेषः विक्रमः- वि. पू. प. कर्मधारय स. & विशेषविक्रमे रुचिः - विशेषविक्रमरुचिन्- स. तत्पुरुष स., शीर्षावशेषाकृतिः- one who has only head for the body- शीर्षम्- head, अवशेष- remnant, remainder, आकृतिः- figure, form- शीर्षम् एव अवशेषः- शीर्षावशेषः कर्मधारय स. शीर्षावशेषः आकृतिः - both कर्मधारय स. स., दानवपतिः- lord of Demons- दानवः- a Demon, पतिः- lord, master- दानवानाम् पतिः- ष. तत्पुरुष स., एषः (एतद्)- this, राहुः- Rahu- a name of a demon- supposed to cause eclipse of the Sun and the Moon- all in पु. लिं. प्र. वि. ए. व., तान्- them-

in पु. लिं. द्वि. वि. ब. व. of तद्- that, he, वैरायते & ग्रसते- वर्त. प्र. पु. ए. व. of नाम सा. धातु of वैरम्- enmity- to cause enmity- १० ग. आ. प. & ग्रस्- १ ग. आ. प. to swallow, to eclipse, भास्करौ/भास्वरौ, द्वौ & दिवाकरनिशाप्राणेश्वरौ- all in पु. लिं. द्वि. वि. द्वि. व. of भास्करः/भास्वरः - source of brightness- the Sun- भास्- स्त्री. लिं- brightness, light- भाः करोति इति- उपपद तत्पुरुष स./भास्सु वरः - स. तत्पुरुष स., द्वा- two & दिवाकरनिशाप्राणेश्वरः- the Sun and the Moon- दिवाकरः- the Sun- दिवा- day, day time- दिवाम् करोति इति- उपपद तत्पुरुष स. निशाप्राणेश्वरः- the lord of night- the Moon- निशा- night, प्राणः- life, breath of life, ईश्वरः- lord, master- प्राणानाम् ईश्वरः- प्राणेश्वरः & निशायाः प्राणेश्वरः- निशाप्राणेश्वरः- both ष. तत्पुरुष स., पर्वणि- in न. लिं. स. वि. ए. व. of पर्वन्- fourteenth day of each half of month- day of new or full moon, अपि- also, even, न- not, no, प्रति- towards, against, for & एव- mere, just, only- all अव्ययs

**वहति भुवनश्रेणीं शेषः फणाफलकस्थितां**
**कमठपतिना मध्येपृष्ठं सदा स विधार्यते।**
**तमपि कुरुते क्रोडाधीनं पयोनिधिरादरात्**
**अहह महतां निःसीमानश्चरित्रविभूतयः॥३५॥**

शेषः फणाफलकस्थिताम् भुवनश्रेणीम् वहति। सः कमठपतिना मध्येपृष्ठम् सदा विधार्यते। अहह! पयोनिधिः तम् अपि आदरात् क्रोडाधीनम् कुरुते। महताम् चरित्रविभूतयः निःसीमानः (भवन्ति)॥

Adishesha carries the entire load of the three worlds on his hood. He in-turn gets carried by the King-tortoise on the middle of his back. The ocean also shelters him in his laps with great honour. What a wonder! There is indeed no limit to the glorious tales of the great people

शेषः, सः & पयोनिधिः all in पु. लिं. प्र. वि. ए. व. of शेष- Ādiśeṣa- celestial serpent, on which Lord Vishnu reclines, तद्- he & पयोनिधि- ocean- पयस्- न. लिं.- water, निधि- abode, reservoir, treasury- पयसाम् निधिः-ष. तत्पुरुष स., फणाफलकस्थिताम् & भुवनश्रेणीम्- स्त्री. लिं. द्वि. वि. ए. व. of फणाफलकस्थिता- standing on the platform of the hood- फणा- स्त्री. लिं.-

hood of a snake, फलक- plank, board, flat surface, स्थित- standing, staying- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stand, stay- फलकः इव फणा- उपमा उत्तरपद कर्मधारय स.- फणाफलकः- फणाफलके स्थितम्- फणाफलकस्थितम्- स. तत्पुरुष स. & भुवनश्रेणी- entire world, भुवनम्- न. लिं. world, श्रेणी- group, line- भुवनानाम् श्रेणी- ष. तत्पुरुष स. वहति & कुरुते- वर्त. प्र. पु. ए. व. of वह्-१ ग. प. प. to carry, bear & कृ- ८ ग. उ. प. to do, make, कमठपतिना- पु. लिं. तृ. वि. ए. व. of कमठपति- कमठ- tortoise, पति- lord, husband- कमठनाम् पतिः -ष. तत्पुरुष स., मध्येपृष्ठम्- न. लिं. प्र. वि. ए. व. of मध्येपृष्ठ- मध्ये- अव्यय- at the centre, middle, पृष्ठ- back- अव्ययीभाव स., सदा- अव्यय- always, every day, विधार्यते- gets borne, carried- कर्मणि प्रयोग तृ. पु. ए. व. of वि+ धृ- (धृ- धरति १ ग. प. प. to bear, hold) अहह- अव्यय- a particle of interjection implying: wonder, sorrow, pity, तम् & क्रोडाधीनम्- पु. लिं. द्वि. वि. ए. व. of तद्- he & क्रोडाधीन- held in the laps, held within- क्रोड- middle part of anything, cavity, bosom आधीन- in possession, under the hold- क. भू. धा. वि. of आ+धि- (धि- - धियति- ६ ग. प. प. to hold, possess, have)- क्रोडस्य आधीनः- ष. तत्पुरुष स., अपि- अव्यय- also, even, आदरात्- पं. वि. ए. व. of आदर- respect, honour, reverence, महताम्- पु. लिं. ष. वि. ब. व. of महत्- great, mighty, निःसीमानः & चरित्रविभूतयः- पु. लिं. प्र. वि. ब. व. of निःसीमान्- without any boundary, limitless- निस्- अव्यय- prefix implies: devoid of, absence of, सीमान्- पु. लिं.- boundary, limit- निर्गता सीमान् यस्य सः- निःसीमान्- प्रादि बहुव्रीहि स. & चरित्रविभूति- चरित्रम्- न. लिं.- conduct, deed, performance- विभूति- स्त्री. लिं.- Greatness, dignity, magnificence- चरित्राणाम् विभूतिः -ष. तत्पुरुष स.

**वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश**
**प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः।**
**तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे**
**न चासौ सम्पातः पयसि पयसां पत्युरुचितः॥३६॥**

तुषाराद्रेः सूनोः उद्गच्छद्-बहुलदहन-उद्गार-गुरुभिः समद-मघवन्-मुक्त-कुलिश-प्रहारैः पक्ष-च्छेदः वरम् (भवति)। (किन्तु) अहह, पितरि क्लेश-विवशे (सति), पयसां पत्युः पयसि असौ सम्पातः न च उचितः (अस्ति)॥

*(Originally, all mountains were supposed to have wings and were creating lots of distress to everyone. Lord Indra is said to have cut Himalaya's wings with his Vajrayudha. Here, Mainak (मैनाकः) mountain, son of Himalaya, seeing his father's wings being cut did not help him but ran away and took shelter under the Ocean.)*

For the son of Himalaya (मैनाकः), it would have been better if he had suffered the agony of getting his wings cut, with violent spitting out unbearable burning cries, under blows of a thunderbolt released by arrogant Indra. But alas, while his father was undergoing that same distress, his running away and taking shelter under the Ocean bed is the most unbecoming act.

तुषाराद्रेः & सूनोः- both in पु. लिं. ष. वि. ए. व. of तुषाराद्रिः- Himalaya mountain- तुषारः- adjctv- ice, snow frost, अद्रिः- mountain- तुषारैः आच्छादित: अद्रिः- मध्यम पद लोपी स. & सूनुः- son, child, उद्गच्छद्बहुलदहनोद्गारगुरुभिः & समदमघवन्मुक्तकुलिशप्रहारैः- both in पु. लिं. तृ. वि. ब. व. of उद्गच्छद्बहुलदहनोद्गारगुरुः- violent spitting out unbearable burning cries- this is a composition of all adjctvs- उद्गच्छत्- arising, shooting up, बहुल- dense, large, दहन्- burning उद्गार- spitting out, giving out, गुरुः- mighty, violent & समदमघवन्मुक्तकुलिशप्रहारः- a blow of a thunderbolt released by arrogant Indra- मद- rut, arrogance- मदेन सह- समद- सहबहुव्रीहि स. मघवन्- name of Indra- समदः मघवा- वि. पू. प. कर्मधारय स., मुक्त- released- क. भू. धा. वि. of मुंच्- मुञ्चते ६ ग. उ. प., समदमघवता मुक्तः- तृ. तत्पुरुष स.. कुलिश- the thunderbolt, समदमघवन्मुक्तः कुलिशः- वि. पू. प. कर्मधारय स. प्रहारः- striking, blow- समदमघवन्मुक्तकुलिशस्य प्रहारः- ष. तत्पुरुष स., पक्षच्छेदः- cutting of wings- पक्षः- wing, छेदः- cutting, felling down- पक्षयोः छेदः- पक्षच्छेदः- ष. तत्पुरुष स., असौ (अदस्)- that, सम्पातः- falling down, descending, उचितः- fit, proper, good- उचित-क. भू. धा. वि. of उच्- उच्यति ४ ग. प. प. to be fit, fond of- all in पु. लिं. प्र. वि. ए. व., पितरि && क्लेशविवशे- both in पु. लिं. स. वि. ए. व. of पितृ- father & क्लेशविवशः- क्लेशः- distress, agony, विवशः- helpless, having lost control, पयसि & पयसां- in न. लिं.- स. वि ए. व. & ष. वि. ब. व. of पयस्- water, पत्युः- in पु. लिं. ष. वि. ए. व. of पतिः- master, husband, वरम्- better, preferred, excellent, अहह- a particle of exclamation, न- no, not, च-and- all अव्ययs

**यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः।**
**तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते॥३७॥**

यद् इनकान्तः, अचेतनः अपि, सवितुः पादैः स्पृष्टः, प्रज्वलति । तद् तेजस्वी पुरुषः परकृतनिकृतिम् कथम् सहते?

Even a lifeless Sunstone, fires up (with anger), if touched by the feet (rays) of the Sun. Then, how can a brilliant person tolerate dishonesty done by others?

इनकान्तः- sunstone, sun crystal- इनः (सूर्यः)- the Sun, कान्तः- beloved, husband, favourite- कान्त- क. भू. धा. वि. of कम्- कामयते १० ग. आ. प. to love, be enamoured of- इनस्य कान्तः- इनकान्तः (सूर्यकान्तः)- ष. तत्पुरुष स., स्पृष्टः- touched, - क. भू. धा. वि. of स्पृश्- स्पृशति- ६ ग. प. प. to touch, lay the hand on, तेजस्वी (तेजस्विन्)- adjctv- brilliant, illustrious, dignified, पुरुषः- man, person & अचेतनः- lifeless, inanimate- चेतन- adjctv- alive, living, lively- न चेतनः- अचेतनः- नञ् तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., यद्- which, when & तद्- that, it- both in न. लिं. प्र. वि. ए. व., सवितुः- in पु. लिं. ष. वि. ए. व. of सवितृ- Sun, पादैः- in पु/न. लिं. तृ. वि. ब. व. of पाद- foot, a ray of light, परकृतनिकृतिम्- in स्त्री. लिं. द्वि. वि. ए. व. of परकृतनिकृतिः- deception done by the others, पर- other, कृत-done, made- क. भू. धा. वि. of कृ- करोति-कुरुते ८ ग. उ. प. to do, निकृतिः- wickedness, fraud, dishonesty, deception- परेण कृतम्- परकृतम्- तृ. तत्पुरुष स. & परकृता निकृतिः- परकृतनिकृतिः- विशेषणपूर्वपदकर्मधारय स., प्रज्वलति & सहते- both वर्त. प्र . पु. ए. व. of प्र+ ज्वल्- burn brightly, get ignited- (ज्वल्- ज्वलति- १ ग. प. प. to burn) & सह्- १ ग. आ. प. to tolerate, bear, endure, अपि-also, कथम्- how, in what manner- both अव्ययs

**सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु।**
**प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः॥३८॥**

सिंहः, शिशुः अपि, मदमलिनकपोलभित्तिषु गजेषु निपतति। इयम् सत्त्ववताम् प्रकृतिः (एव अस्ति)। तेजसः हेतुः (तेजः अस्ति), वयः न खलु (अस्ति) ॥

The lion, even as a cub, attacks mighty elephants in rut, soiled with secretions from their temples. That is the nature of courageous people. Valour matters for the brilliant people and not the age.

सिंहः- lion, शिशुः- child, young one, हेतुः -cause, reason, object, matter- all in पु. लिं. प्र. वि. ए. व., वयः- न. लिं. प्र. वि. ए. व.- वयस्- age, इयम् & प्रकृतिः -स्त्री. लिं. प्र. वि. ए. व. of इदम्- this, she, सत्त्ववताम्- पु. लिं. ष. वि. ब. व. of सत्त्ववत्- a person with courage or valour- सत्त्व- courage or valour, वत्- suffix implies possession, तेजसः-न. लिं. ष. वि. ए. व. of तेजस्- brightness, or valour, मदमलिनकपोलभित्तिषु- - स्त्री. लि. स. वि. ब. व.of मदमलिनकपोलभित्ति- मद- ichors or juice that exudes, when in rut, मलिन- adjctv- dirty, soiled- मदेन मलिनम्- मदमलिनम्- soiled with ichors, कपोल- पु. लिं. -cheek, भित्ति- स्त्री. लिं- wall, any place, कपोलस्य भित्तिः -कपोलभित्ति- ष. तत्पुरुष स.- elephant's temples मदमलिनम् कपोलभित्तिः -वि. पूर्वपद कर्मधारय स., गजेषु -पु. लिं. स. वि. ब. व. of गज- elephant, अपि- अव्यय- even, also, and, निपतति- attacks, falls upon- वर्त. प्र. पु. ए. व. of नि+ पत्- to fall upon, attack, (पत्- पतति १ ग. प. प. to fall, come down, न-no, not, खलु- अव्यय- really, indeed

# 4. द्रव्यमहिमा - Greatness of Wealth

It is well known all over the world that wealthy people get many benefits in life whether they deserve them or not.

Money is the only thing that matters, without it, all other qualities are as insignificant as a piece of straw.

A wealthy person is considered well-born, wise, handsome and a great speaker. All virtuous qualities rest with wealth.

But Bhartṛhari also suggests that wealth should be used properly. It should either be enjoyed or given away. Otherwise, it goes to waste!

**जातिर्यातु रसातलं गुणगणस्तत्राप्यधो गच्छतां**
**शीलं शैलतटात्पतत्वभिजन: संदह्यतां वह्निना।**
**शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु न: केवलं**
**येनैकेन विना गुणास्तृणलवप्राया: समस्ता इम॥३९॥**

जातिः रसातलम् यातु। गुणगणः तत्र अपि अधः गच्छताम्। शीलम् शैल-तटात् पततु। अभिजन: वह्निना संदह्यताम्। शौर्ये वैरिणि वज्रम् आशु निपततु। न: केवलम् अर्थः अस्तु। येन एकेन विना, इमे समस्ताः गुणाः तृण-लव-प्राया:( सन्ति)॥

Let the family go to hell! Let all good qualities go down even lower! Let morality fall from the mountain top! Let relatives be burnt by fire! Let lightning destroy our brave hero quickly! For us, only money matters. Without it, all these qualities are as insignificant as a piece of straw.

जातिः, गुणगणः, अभिजन:, रसातलम्, & अर्थः- all प्र. वि. ए. व. of जाति (स्त्री. लिं)- race, family, गुणगण-(पु. लिं) -collective good qualities (गुणानाम् गणः ष. तत्पुरुष स.), अभिजन-relatives, family, रसातल-रसा-hell, lower of

infernal regions, तलम्- तलः base, lowness, रसायाः तलम् -ष. तत्पुरुष स. & अर्थ (पु. लिं) wealth, money (also means- object, purpose, desire etc), यातु, पततु, निपततु, अस्तु -all आज्ञार्थ प्र. पु. ए. व. of या-याति २ ग. प. प. to go, पत् -पतति १. ग. प. प. to fall, नि+पत्- to fall down, अस्- अस्ति २ग. प. प. to be, तस्य- his, its ष. वि. ए. व. of तद्; गच्छताम्, संदह्यताम् -both आज्ञार्थ प्र. पु. ब. व. of गम् -गच्छति- to go & सं+दह्- to burn (दह् दहति १ ग. प. प. to burn), शीलम्- द्वि. वि. ए. व. of शील- character, morality, शैलतटात् -पं. वि. ए. व. of शैलतट-hill cliff (शैलस्य तटः- ष. तत्पुरुष स.), वह्निना-by fire, येन- by whom, एकेन- by alone- both पु. लिं, तृ. वि. ए. व. of वह्नि, यद् & एक, शौर्ये - स. वि. ए. व. of शौर्य- valour, heroism, वैरिणि-पु. लिं, स. वि. ए. व. of वैरिन्- enemy, hero वज्रम्- lightening, नः (अस्माकम्)-ours ष. वि. ब. व. of अस्मद् I, we, इमे- these पु. प्र. वि. ब.व of इदम् -this , समस्ताः all, entire, गुणाः-qualities, तृणलवप्रायाः -like bit of straw -all प्र. वि. ब. व. of इदम्, अदस्, समस्त, गुण & तृणलवप्राय-तृण- grass, लव-piece, bit, प्रायस्-अव्यय-likely, mostly, generally-अधस्-below, down, तत्र- there, अपि-even, also, केवलम्-only, merely, solely, विना-without, except, आशु- quickly, soon-all - अव्यय indeclinable

**तानीन्द्रियाण्यविकलानि तदेव नाम**
**सा बुद्धिरप्रतिहता वचनं तदेव।**
**अर्थोष्मणा विरहितः पुरुषः क्षणेन**
**सोऽप्यन्य एव भवतीति विचित्रमेतत्॥४०॥**

(पुरुषस्य) तानि इन्द्रियाणि अविकलानि एव (सन्ति)। तद् नाम (एव) (अस्ति)। सा बुद्धिः अप्रतिहता (एव अस्ति)। वचनम् तद् एव (अस्ति)। सः पुरुषः क्षणेन अपि अर्थोष्मणा विरहितः, अन्यः एव भवति। एतत् विचित्रम् इति॥

All his (sensory and functional) organs are not impaired. His name is just the same. His intelligence remains unaffected. His speech also remains just the same. (However), the moment the warmth of wealth leaves him, that person becomes a totally different man! That indeed is very strange!

तानि, अविकलानि & इन्द्रियाणि- न. लिं. प्र. वि. ब. व. of तद्-that, it, अविकल- unimpaired, perfect- विकल- impaired- न विकल- अविकल- नञ् तत्पुरुष

स., इन्द्रिय- organ of sense or function, नाम, तद्, वचनम्, एतत् & विचित्रम्- all in न. लिं. प्र. वि. ए. व. of नामन्- name, तद्- that, it, वचन- speech, talk, एतद्- this & विचित्र- strange surprising, अप्रतिहता, बुद्धिः & सा- all in स्त्री. लिं. प्र. वि. ए. व. of अप्रतिहत- unimpeded, irresistible, unaffected- न प्रतिहत- अप्रतिहत- नञ् तत्पुरुष स.- (प्रतिहत- क. भू. धा. वि. of प्रति+ हन्- affect, impede- हन्- हन्ति २ ग. प. प. to strike, kill, बुद्धि- intelligence, knowledge & तद्- she, सः (तद्)- he, पुरुषः- man, person, human, विरहितः- devoid of, deprived of- (विरहित- क. भू. धा. वि. of वि+ रह्- to be devoid of- रह्- रहति १ ग. प. प. to quit, leave)- अन्यः- another, other- all in पु. लिं. प्र. वि. ए. व., अर्थोष्मणा & क्षणेन- तृ. वि. ए. व. of अर्थोष्मन्- warmth of wealth- अर्थ- wealth, money, उष्मन्- पु. लिं.- heat, warmth- अर्थस्य उष्मा- अर्थोष्मन्- ष. तत्पुरुष स. & क्षण- a moment, shortest time, भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, एव- just so, only, alone, अपि- even, also, इति- particle used to express very word spoken- namely, thus, so- all अव्ययs

**यस्यास्ति वित्तं स नरः कुलीनः**
**स पण्डितः स श्रुतवान् गुणज्ञः।**
**स एव वक्ता स च दर्शनीयः**
**सर्वे गुणाः काञ्चनमाश्रयन्ति॥४१॥**

यस्य वित्तम् अस्ति, सः नरः कुलीनः (भवति)। सः पण्डितः, सः श्रुतवान्, गुणज्ञः (च), सः एव वक्ता, सः च दर्शनीयः (इति गण्यते)। सर्वे गुणाः काञ्चनम् आश्रयन्ति॥

A person with wealth is considered well-born. He is considered a wise man. He is proficient in sacred knowledge. He possesses all meritorious qualities. He alone is a great speaker and is very presentable. All virtuous qualities take shelter (under a person) who has (plenty of) gold (wealth).

नरः- man, person, human कुलीनः- of a good descent, well- born, of a good family- (कुलम्- family, lineage, ancestry, descent), सः (तद्)- that person, पण्डितः- a scholar, wise man, श्रुतवान् (श्रुतवत्)- proficient in sacred knowledge (श्रुत- well known, celebrated, that which was heard by revelation i.e. Vedas, sacred knowledge- क. भू. धा. वि. of श्रु-

शृणोति ५ ग. प. प. to hear, listen to & वत् suffix implies quality), गुणज्ञः- one with meritorious qualities- गुणः- quality, merit, virtue, ज्ञः- suffix implies: knowledgeable- गुणान् जानाति इति- उपपद तत्पुरुष स., वक्ता- (वक्तृ)- speaker, orator, दर्शनीयः- one worth having a look, presentable, handsome- दर्शनीय (also देष्टव्य & दृश्य) - क. वि. धा. सा. वि. of दृश्- पश्यति १ ग. प. प. to see, look at- all in पु. लिं. प्र. वि. ए. व., यस्य- in पु. लिं. ष. वि. ए. व. of यद्- who, अस्ति- वर्त. प्र. पु. ए. व. of अस्-२ ग. प. प. to be, to exist, सर्वे & गुणाः- both in पु. लिं. प्र. वि. ब. व. of सर्व- adjctv- all, entire, whole & गुणः- quality, virtue, merit, वित्तम्- wealth, money, property- in न. लिं. प्र. वि. ए. व., काञ्चनम्- gold, wealth- in न. लिं. द्वि. वि. ए. व., आश्रयन्ति- वर्त. प्र. पु. ब. व. of आ+ श्रि- to resort to, have recourse to- (श्रि- श्रयति ते १ ग. उ. प. to go to, attain to), एव- only, merely, alone, just, च- and- both अव्ययs

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।**
**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥४३॥**

वित्तस्य दानम्, भोगः, नाशः (इति) तिस्रः गतयः भवन्ति। यः न ददाति न भुङ्क्ते तस्य तृतीया गतिः भवति॥

There are three courses for wealth; charity, utilisation or destruction. One who does not donate nor enjoys his wealth, brings it to the third stage (destruction).

वित्तस्य- ष.वि. ए. व. of वित्तम्- wealth, दानम्- charity, giving- न. लिं.प्र. वि. ए. व., भोगः- enjoying, utilising, & नाशः- destruction all in पु. लिं. प्र. वि. ए. व., तिस्रः & गतयः- both स्त्री.लिं. प्र. वि. ब. व. of त्रि- three & गति- course, mode of existence, motion, भवन्ति- प्र. पु. ब. व. of भू -भवति १ ग. प. प. to be, to happen, यः- पु. लिं. प्र. वि. ए. व.of यद्, तृतीया- स्त्री. लिं. प्र. वि. ए. व. of तृतीय-adjctv- third, ददाति -दा - ३ ग. प. प. प्र. ए. व., भुङ्क्ते - भुज् - भुनक्ति, भुङ्क्ते ७ ग. उ. प.

**परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये स**
**पश्चात्सम्पूर्णः कलयति धरित्रीं तृणसमाम्।**

**अतश्चानैकान्त्याद् गुरुलघुतयाऽर्थेषु धनिनाम-**
**-वस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥४५॥**

कश्चित् परिक्षीणः प्रसृतये यवानाम् स्पृहयति। पश्चात् सः (यदा) सम्पूर्णः (भवति तदा) धरित्रीम् तृणसमाम् कलयति। अतः च अर्थेषु गुरुलघुतया अनैकान्त्याद्, धनिनाम् वस्तूनि अवस्था प्रथयति च सङ्कोचयति च॥

Some impoverished person humbly longs (only) for a handful of barley. (But) after becoming a prosperous man later, he considers earth equivalent to a straw. Thus, due to the unsteady, big and small nature of wealth, rich people's materialistic state grows or shrinks accordingly.

कश्चित् (कः चित्)- someone, परिक्षीणः- impoverished, emaciated- क. भू. धा. वि. of परि+ क्षि- (क्षि- क्षयति १ ग प. प. to decay, ruin, diminish), सः (तद्)- he, सम्पूर्णः- full, accomplished, prosperous- क. भू. धा. वि. of सं+ पूर्- (पूर्- पूर्यते ४ ग. आ. प. to fill)- all in- पु. लिं. प्र. वि. ए. व., यवानाम्- in- पु. लिं. ष. वि. ब. व. of यवः- barley, प्रसृतये- पु. लिं. स. वि. ए. व. of प्रसृतः-palm of hand stretched out, modest, humble- प्रसृत- क. भू. धा. वि. of प्र+सृ- to spread, prevail- (सृ- सरति, सिसर्ति १, ३ ग. प. प. to go, move, स्पृहयति, कलयति, प्रथयति & सङ्कोचयति- all in वर्त. प्र. पु. ए. व. of स्पृह्- १० ग. उ. प. to desire for, long for, कल्- count, hold, consider, प्रथ्- १० ग. उ. प. to extend, increase, spread, proclaim & सं+कुच्- (प्रयोजक)- to shrink, diminish, contract- (कुच्- कुचति ६ ग. प. प. to contract, to go, to utter), धरित्रीम् & तृणसमाम्- both स्त्री. लिं. द्वि. वि. ए. व. of धरित्री- earth, land & तृणसमा- like a straw- तृणम्- grass, straw, सम- adjctv- like, similar to- तृणस्य समा - तृणसमा- षष्ठी तत्पु स., अनैकान्त्यात् = अनिश्चतत्वेन- due to uncertain nature, unsteady condition- न. लिं. पं. वि. ए. व. of अनैकान्त्यम्- unsteady, uncertain, एकान्त- solitary, absolute, invariable- एकान्तस्य भाव- ऐकान्त्यम्- absoluteness, invariability- न ऐकान्त्यम्- अनैकान्त्यम्- नञ् तत्पुरुष स., अर्थेषु- पु. लिं. स. वि. ब. व. of अर्थः- wealth, money, property, गुरुलघुतया- स्त्री. लिं. तृ. वि. ए. व. of गुरुलघुता- big and small size- गुरु- big, huge, लघु- small, minute- गुरुः च लघुः च- गुरुलघुः- ता- suffix implies quality, धनिनाम्- in- पु. लिं. ष. वि. ब. व. of धनिन्- a wealthy person, rich-man, अवस्था- state, condition, वस्तूनि- न.

लिं. द्वि. वि. ब. व. of वस्तु- item, matter, article, च- and, पश्चात्- after, subsequently, then, अतः (अतस्)- therefore, from this, than- all अव्ययs

**यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं**
**तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ च नातोऽधिकम्।**
**तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः**
**कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्॥४९॥**

(मनुष्यः), धात्रा यद् निज-भाल-पट्ट-लिखितम्, स्तोकम् वा महत् धनं, तद् मरुस्थले अपि नितराम् प्राप्नोति। अतः अधिकम् मेरौ च न (प्राप्नोति) । (हे मनुष्य), तद् धीरः भव। वित्तवत्सु वृथा कृपणाम् वृत्तिम् मा कृथाः। पश्य, घटः कूपे पयोनिधौ अपि तुल्यं जलं गृह्णाति॥

One certainly gets, even in a desert, whatever wealth, meagre or large, written on his forehead by God. He does not get anything more than that, even on top of mount Meru. Therefore, (you) be brave and do not unnecessarily hold jealousy towards wealthy people. (You) see, a pot draws the same quantity of water, whether in a well or in an ocean.

धात्रा- पु. लिं. तृ. वि. ए. व. of धातृ- maker, epithet of Brahma, यद् - which, what, निजभालपट्टलिखितम्- written on his own forehead, निज-adjctv- one's own, innate, भाल- forehead, पट्ट- strip or tablet (to write upon), लिखित- written, write-up- क. भू. धा. वि. of लिख्- लिखति ६ ग. प. प. to write, inscribe- निजस्य भालम्- निजभालम्- निजभालस्य पट्टम् - निजभालपट्टम्- both ष. तत्पुरुष स.- निजभालपट्टे लिखितम्- निजभालपट्टलिखितम्- स. तत्पुरुष स., तद्-that, स्तोकम्-adjctv- little, small, महत्- adjctv- large, great, big, धनम्- wealth money, अधिकम्- adjctv- more, additional, तुल्यम्- adjctv- of same measure, measurable- धा. सा. अव्यय of तुल्- तोलति १ ग. प. प. to measure, जल- water- all in न. लिं. द्वि. वि. ए. व., वा- अव्यय- or, and, मरुस्थले, मेरौ, कूपे & पयोनिधौ- स. वि. ए. व. of मरुस्थल- desert place- मरुः -( पु. लिं.) desert, स्थलम्-( न. लिं.)- place- मरोः स्थलम्- मरुस्थलम्- ष. तत्पुरुष स., & मेरु- mount by name Meru (which is supposed to be full of treasures), कूप- well, पयोनिधि- ocean- पयस्-न. लिं.-water, निधि- treasure, पयसः निधिः - ष. तत्पुरुष

स.,अपि- अव्यय- also, even, and, नितराम्- अव्यय- entirely, fully, certainly, प्राप्नोति-gets, receives & गृह्णाति- holds, catches- both वर्त. प्र. पु. ए. व. of प्र+आप्- (आप्- आप्नोति ५ ग. प. प. to get) & ग्रह्-९ ग. प. प. to hold, catch), अतः (अतस्)- अव्यय- than this, from this, च-and, न- no, not, धीरः, घटः - पु. लिं. प्र. वि. ए. व. of धीर- brave घट- pot, भव & पश्य- both आज्ञार्थ म. पु. ए. व. of भू-भवति १ ग. प. प. to be, to exist & दृश्-पश्यति १ ग. प. प. to see, observe, वित्तवत्सु- पु. लिं. स. वि. ब. व. of वित्तवत्- a wealthy person, वृथा- अव्यय- unnecessarily, needlessly, कृपणाम् & वृत्तिम् -स्त्री. लिं. द्वि. वि. ए. व. of कृपण- adjctv- mean, wretched, void of judgement & वृत्ति- attitude, behaviour, मा- अव्यय- a particle of prohibition, मा कृथाः -do not do

**भीमं वनं भवति तस्य पुरं प्रधानं**
**सर्वो जनः स्वजनतामुपयाति तस्य।**
**कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा**
**यस्यास्ति पूर्वसुकृतं विपुलं नरस्य॥१०३॥**

यस्य नरस्य पूर्वसुकृतम् विपुलम् अस्ति, तस्य भीमम् वनम् प्रधानम् पुरम् भवति, तस्य सर्वः जनः सुजनताम् उपयाति, कृत्स्ना भूः सन्निधिरत्नपूर्णा च भवति॥

For a man whose meritorious deeds in the past are plenty, a dreadful forest becomes a major urban place. All people behave kindly with him. For him, the entire earth is a treasure house of jewels.

यस्य, नरस्य & तस्य- पु. लिं. ष. वि. ए. व. of यद्- who, नर- man, person, तद्- he, पूर्वसुकृतम्- meritorious deeds of last birth- पूर्व-last, सु-good, virtuous, कृतम्- deed- (कृत- क. भू. धा. वि. of कृ-करोति- कुरुते ८ ग. उ. प. to do)- सुभगम् कृतम्- सुकृतम्- समा. प्रादितत्पुरुष स., पूर्वम् सुकृतम्- पूर्वसुकृतम्- विशेषणपूर्वपद कर्मधारयस., विपुलम्- plenty, ample, large, भीमम्- fearful, dreadful, वनम्- forest, प्रधानम्- adjctv- excellent, principal, major, पुरम्- city, town- all in- न. लिं. प्र. वि. ए. व., अस्ति, भवति & उपयाति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, भू- १ ग. प. प. to be, to exist & उप+या- to approach, attain, provide, सर्वः-all,

entire & जनः- people - both in पु. लिं. प्र. वि. ए. व., सुजनताम्- स्त्री. लिं. द्वि. वि. ए. व. of सुजनता- kindness, benevolence, कृत्स्ना- entire, whole, भूः- earth, land & सन्निधिरत्नपूर्णा- full with precious treasure of jewels, सत्- good, निधि- treasure, hoard, रत्न- jewel, पूर्ण- full of- क. भू. धा. वि. of पूर्-पूर्यते ४ ग. आ. प. to fill, fill out- सत् निधि- सन्निधि- समा. प्रादितत्पुरुष स., रत्नानाम् सन्निधिः- सन्निधिरत्नम्- सन्निधिरत्नेन पूर्णम् या सा- सन्निधिरत्नपूर्णा- all in- स्त्री. लिं. प्र. वि. ए. व., च- and

**अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः।**
**परपरिवादनिवृतैः क्वचित्क्वचिन्मण्डिता वसुधा॥१०५॥**

वसुधा, अप्रियवचनदरिद्रैः, प्रियवचनाढ्यैः, स्वदारपरितुष्टैः, परपरिवादनिवृत्तैः क्वचित् क्वचित् मण्डिता (भवति)॥

This Earth is adorned, here and there, with some people who are poor in speaking harsh language, those who are rich in friendly talks, those who are fully satisfied with their own wives and those who refrain from abusing others.

वसुधा- world, earth- वसु- न. लिं.- wealth, riches- वसु धारयति इति- उपपद तत्पुरुष स. & मण्डिता- adorned, decorated- मण्डित- क. भू. धा. वि. of मण्ड्- मण्डति १ ग. प. प. to adorn, decorate - both in स्त्री. लिं. प्र. वि. ए. व., अप्रियवचनदरिद्रैः, प्रियवचनाढ्यैः, स्वदारपरितुष्टैः, परपरिवादनिवृत्तैः- all in पु. लिं. तृ. वि. ब. व. of अप्रियवचनदरिद्रः- one who is devoid bad language- प्रिय- adjctv- dear, welcome, desired- न प्रिय- अप्रिय- नञ्तत्पुरुष स., वचनम्- talk, speech, दरिद्रः- poor, to be devoid of- अप्रियम् वचनम्- वि. पू. प. कर्मधारय स. & अप्रियवचनेषु दरिद्रः- स. तत्पुरुष स., प्रियवचनाढ्यः- one who is copious in friendly talks- आढ्य- adjctv- copious, rich, abounding in- प्रियम् वचनम्- वि. पू. प. कर्मधारय स. & प्रियवचनेषु आढ्यः- स. तत्पुरुष स, स्वदारपरितुष्टः- one who is fully satisfied with his own wife- स्व- pron. adjctv- one's own, self, दाराः- a wife, परितुष्टः- very happy, fully satisfied- परितुष्ट- क. भू. धा. वि. of परि+ तुष्- (परि- अव्यय- prefix implies: very much, excessively- तुष्- तुष्यति ४ ग. प. प. to be happy, satisfied)- स्वस्य दाराः- स्वदाराः- ष.तत्पुरुष स. & स्वदारेषु परितुष्टः- स. तत्पुरुष स.,

परपरिवादनिवृत्तः- one who refrains from abusing others- पर- adjctv- other, another, परिवाद- abuse, blame, censure, निवृत्तः- refrained retired, ceased- निवृत्त- क. भू. धा. वि. of नि+ वृत्- to retreat, to turn away from- (वृत्- वर्तते १ ग. आ. प. to be, to exist)- परस्य परिवादः- ष. तत्पुरुष स. & परपरिवादात् निवृत्तः- पं. तत्पुरुष स., क्वचित्- in some places, in some cases- क्वचित् क्वचित्- very rarely, here and there- अव्यय

# 5. दुर्जनपद्धति - Ways of the Wicked

In this chapter, Bhartṛhari discusses various qualities of bad people and their behavior in the society.

A lack of compassion, quarrelling without reason, covetousness of other's wealth and women and intolerance towards good people are the inherent qualities of wicked people. Virtues like modesty, honesty, steadiness etc are stigmatized by them.

Thus, one should avoid the company of wicked people.

**कृमिकुलचितं लालाक्लिन्नं विगन्धिजुगुप्सितं**
**निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषम्।**
**सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शंकते**
**न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्॥९॥**

क्षुद्रः जन्तुः परिग्रहफल्गुताम् न हि गणयति, (यथा) श्वा कृमिकुलचितम्, लालाक्लिन्नम्, विगन्धिजुगुप्सितम्, निरुपमरसम्, निरामिषम्, नरास्थि प्रीत्या खादन्, पार्श्वस्थम् सुरपतिम् अपि विलोक्य न शंकते॥

A mean person does not bother about any repulsive environment. A dog does not hesitate to happily devour a human bone, fully infested by worms, soaked in its saliva, with disgusting smell, devoid of any taste and flesh, even after looking at the King of Gods, standing beside him.

क्षुद्रः- adjctv- mean, low,, small, जन्तुः:- a creature, living being, man, श्वा- (श्वन्)- a dog & खादन्- eating, devouring- वर्त. का. वा. धा. सा. वि. of खाद्- खादति १ ग. प. प. to eat, devour- all in- पु. लिं. प्र. वि. ए. व. परिग्रहफल्गुताम् - स्त्री. लिं. द्वि. वि. ए. व., परिग्रहफल्गुता- surrounding meanness- परिग्रह- surrounding, circumstantial, फल्गुता- meanness, uselessness- (फल्गु-adjctv- small, mean, useless)- परिग्रहस्य फल्गुता - परिग्रहफल्गुता- ष. तत्पुरुष स., गणयति- वर्त. प्र. पु. ए. व. of गण्- गणयति- ते

१० ग. उ. प. to count, take into account, कृमिकुलचितम्- infested with worms- कृमिः- स्त्री. लि.- a worm, कृमिकुलम् - कृमेः कुलम्- ष. तत्पुरुष स चितम्- covered, infested- क. भू. धा. वि. of (चि- चिनोति- ५ ग. प. प. to collect, gather- कृमिकुले चितम् - कृमिकुलचितम्- तृ. तत्पुरुष स., लालाक्लिन्नम्,- soaked in saliva- लाला- saliva, spittle- क्लिन्नम्- wet, moistened- क्लिन्न- क. भू. धा. वि. of क्लिद्- क्लिद्यति ४ ग. प. प. to become wet- लालया क्लिन्नम् - लालाक्लिन्नम् - तृ. तत्पुरुष स., विगन्धिजुगुप्सितम्- disgusting due to bad smell- विगन्धिन्- dirty smelling- गन्ध- smell, odour, गन्धिन्- smelling, वि- अव्यय- affix implies adverse, intense, जुगुप्सितम्- disliked (जुगुप्सा-dislike, aversion)- विगन्धिना जुगुप्सितम्- तृ. तत्पुरुष स., निरुपमरसम्- (निर्+ उपम+रसम्)- devoid of any comparable taste- निर्-अव्यय- affix implies devoid of, उपम- resemblance, comparison, रसम्- taste- निरुपमं रसं - निरुपमरसम्- कर्मधारय स., निरामिषम्- without any flesh- आमिषम्- flesh, नरास्थि- human bone- नर- man, human- अस्थि- न. लि.- a bone- नरस्य अस्थि- नरास्थि- ष. तत्पुरुष स.- all in न. लिं. द्वि. वि. ए. व., प्रीत्या -स्त्री. लिं. तृ. वि. ए. व. of प्रीति- pleasure, happiness, पार्श्वस्थम् & सुरपतिम्- both in पु. लिं. द्वि. वि. ए. व. of पार्श्वस्थः- standing by the side- पार्श्व- side- पार्श्वे तिष्ठति इति- पार्श्वस्थः- उपपद तत्पुरुष स. & सुरपतिः- Lord of Gods- इन्द्रः- सुरः- God, पतिः- master, lord, husband- सुराणाम् पतिः- सुरपतिः- ष. तत्पुरुष स., विलोक्य - after looking at- पू. का. वा. ल्यबन्त धा. सा. अव्यय of वि+ लोक्- to see, look at- (लोक्- लोकते १ ग. आ. प.- to see) शंकते- वर्त प्र. पु. ए. व. of शंक्- १. ग. आ. प. to doubt, hesitate न- no, not, हि- surely, indeed, अपि- even-all अव्यय

**अकरुणत्वमकारणविग्रहः**
**परधने परयोषिति च स्पृहा।**
**सुजनबन्धुजनेष्वसहिष्णुता**
**प्रकृतिसिद्धमिदं हि दुरात्मनाम्॥५२॥**

अकरुणत्वम्, अकारणविग्रहः, परधने परयोषिति च स्पृहा, सुजनबन्धुजनेषु असहिष्णुता- (एते गुणाः) दुरात्मनाम् प्रकृतिसिद्धम् हि (भवन्ति)॥

A lack of compassion, quarrelling without reason, covetousness of other's wealth and women, intolerance towards good people and relatives are indeed the inherent qualities of wicked people.

अकरुणत्वम्- करुणा- compassion, pity- त्व- suffix implies quality- न करुणत्वम्- अकरुणत्वम्- absence of kindness or compassion- नञ् तत्पुरुष स., इदम्-this, it & प्रकृतिसिद्धम्- inherent quality, naturally proven- प्रकृति- nature, सिद्धम्- proven- (सिद्ध- क. भू. धा. वि. of सिध्- सिध्यति ४ ग. प. प. to accomplish, to be proved) - प्रकृत्या सिद्धम्- प्रकृतिसिद्धम्- तृ. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., अकारणविग्रहः- quarrel without a reason- कारण- reason purpose- न कारण- अकारण- नञ् तत्पुरुष स., विग्रहः- quarrel, strife- अकारणः विग्रहः- अकारणविग्रहः- वि. पू. प. कर्मधारय स.- पु. लिं. प्र. वि. ए. व., परधने- in न. लिं. स. वि. ए. व. of परधनम्- wealth of others- पर- other, धनम्- wealth- परस्य धनम्- परधनम्, परयोषिति- स्त्री. लिं. स. वि. ए. व. of परयोषित्- a woman belonging to other- योषित्- (योषिता, योषा)- young woman, girl- परस्य योषित्- परयोषित्- both- ष. तत्पुरुष स., स्पृहा- greed, covetousness & असहिष्णुता- intolerance, impatience- सहिष्णु- adjctv- patient, tolerant- न सहिष्णु - असहिष्णु- नञ् तत्पुरुष स. ता- suffix implies quality- both in स्त्री. लिं. प्र. वि. ए. व., सुजनबन्धुजनेषु- पु. लिं. स. वि. ब. व. of सुजनबन्धुजनः- good people and kinsman- सु- अव्यय- good, noble- सुष्ठु जनः- सुजनः- प्रादि कर्मधारय स. & बन्धुः- a brother, relative, person- बन्धुः जनः- बन्धुजनः- वि. पू. प. कर्मधारय स. सुजनः च बन्धुजनः च- सुजनबन्धुजनः- द्वंद्व स., दुरात्मनाम्- पु. लिं. ष. वि. ब. व. of दुरात्मन्- wicked person- आत्मन्- self, mind, soul- दुष्टः आत्मा - दुरात्मा- प्रादि कर्मधारय स., हि- indeed, च- and- both अव्ययs

**दुर्जनः परिहर्तव्यो विद्ययालंकृतोअपि सन्।**
**मणिना भूषितः सर्पः किमसौ न भयंकरः॥५३॥**

दुर्जनः, विद्यया अलंकृतः अपि सन्, परिहर्तव्यः (भवति)। असौ सर्पः, मणिना भूषितः, किम् न भयंकरः (भवति)?

An evil person, even if he is well educated, must be avoided. Is not this snake, well adorned with a jewel, not scary?

दुर्जनः, परिहर्तव्यः, भूषितः, अलंकृतः, सर्पः, सन्, भयंकरः & असौ -all in पु. लिं. प्र. वि. ए. व. of दुर्जन- bad or evil person-दुर्-अव्यय- prefix used to imply 'bad', 'hard', 'difficult', जन-person, - प्रादि कर्मधारय स. समास, परिहर्तव्य - to be shunned, avoided - कर्मणि वि. धा. सा. वि. of परि+हृ - (हृ-हरति १ ग. प. प. to take away, steal), भूषित- adorned, qualified- क. भू. धा वि. of भूष्- भूषति १ ग. प. प. & भूषयति-ते १० ग. उ. प. to adorn, decorate, अलंकृत-adorned, decorated - क. भू. धा वि. of अलं+कृ -(कृ -करोति-कुरुते ८ ग. उ. प. to, male, सर्प-snake, सन् -being वर्त. का. वा. धा. सा. वि. of अस्-अस्ति २ ग. प. प. to be, exist, भयंकर- terrifying, terrible- भयम् करोति इति-उपपद तत्पुरुष स. & अदस् -that, he, विद्यया-स्त्री. लिं. तृ. वि. ए. व. of विद्या - knowledge, education, मणिना-पु. लिं. तृ. वि. ए. व. of मणि- jewel, gem, किम् -अव्यय- a particle of interrogation- 'isn't it', न-not, no

**जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भ: शुचौ कैतवं**
**शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि।**
**तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्ति: स्थिरे,**
**तत् को नाम गुणो भवेत्गुणवतां यो दुर्जनैर्नाङ्कित:॥५४॥**

(ऋजौ अथवा मुनौ, गुणवतां अथवा- सुगुणिनां )

ह्रीमति जाड्यम् गण्यते। व्रतरुचौ दम्भ: (गण्यते)। शुचौ कैतवम् (गण्यते)। शूरे निर्घृणता (गण्यते)। ऋजौ (मुनौ) विमतिता (गण्यते) । प्रियालापिनि दैन्यं (गण्यते)। तेजस्विनि अवलिप्तता (गण्यते । वक्तरि मुखरता (गण्यते)। स्थिरे अशक्ति: (गण्यते)। तद् गुणवताम् (सुगुणिनाम् ) कः नाम गुणः भवेत्यः दुर्जनैः न अङ्कित:?

Modesty is considered as dullness. Devotion is taken as hypocrisy. A pure person is counted as a fraud. Bravery is taken as cruelty. An honest (sage) is considered stupid. An agreeable talker is taken as weak. A brilliant person is said to be arrogant. A good speaker is talkative. Steadiness is a weakness. Thus, is there any quality of well-behaved people not stigmatized by the crooked people?

ह्रीमति, व्रतरुचौ, शुचौ, शूरे, ऋजौ (मुनौ), प्रियालापिनि, तेजस्विनि, वक्तरि, स्थिरे all स. वि. ए. व. of ह्रीमत्-modest, bashful- ह्री - modesty, bashfulness - (स्त्री. लि., व्रतरुचि-vow observer, devout- व्रते रुचिः यस्य सः -बहुव्रीहि स.,

शुचि-adjctv-clean, pious, शूर-(पु.लिं) brave, valiant, ऋजि- honest, straight (मुनि-sage), प्रिय- pleasing, agreeable- आलापिन्- talker, speaker- प्रियम् आलापिन्- प्रियालापिन् -कर्मधारय स., तेजस्विन्- brilliant, dignified, वक्तृ-orator, speaker, स्थिर-firm, steady, जाड्यम्, दम्भ:, कैतवम्, निर्घृणता, विमतिता, दैन्यम्, अवलिप्तता, मुखरता, अशक्ति: - all प्र. वि. ए. व. of जाड्य-(न. लिं) dullness, apathy, दम्भ-(पु.लिं) arrogance, hypocrisy, कैतवम्- (न. लिं) deceit, fraud, निर्घृणता-(स्त्री. लि) cruelty, mercilessness, विमतिता- (स्त्री. लि)- stupidity, foolishness, दैन्यम्- (न. लिं) poverty, miserable state, अवलिप्तता-(स्त्री. लि) arrogance, haughtiness, मुखरता- (स्त्री. लि) talkativeness, अशक्ति-(स्त्री. लि) weakness (न शक्तिः - नञ्तत्पुरुष स.), गण्यते- कर्मणि प्रयोग तृ. पु. ए. व. of गण्-गणयति-ते १० ग. उ. प. to count, consider, तद्- that गुणवताम् (सुगुणिनाम् )- ष. वि. ब. व. of गुणवत् /सुगुणिन् wise, well behaved, कः, यः, अङ्कित: & गुणः - प्र. वि. ए. व. of किम्- which, what, यद्- which, what, अङ्कित- stigmatized ( क. भू. धा. वि. of अंक्-अंकयति-ते १० ग. उ. प. to mark, stamp, stigmatize ) & गुण- quality, नाम- namely, भवेत्विध्यर्थ तृ. पु. ए. व. of भू -भवति १ ग. प. प. to be, दुर्जनैः - प्र. वि. ब. व. of दुर्जन- wicked person ( दुष्टः जनः - प्रादि. कर्मधारय स.), न- no, not

**उद्भासिताखिलखलस्य विश्रुङ्खलस्य**
**प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः।**
**दैवादवाप्तविभवस्य गुणद्विषोऽस्य**
**नीचस्य गोचरगतैः सुखमाप्यते कैः॥५९॥**

उद्भासित-अखिल-खलस्य, विश्रृङ्खलस्य, प्राग्जात-विस्तृत-निज-अधम-कर्मवृत्तेः, दैवात् अवाप्त-विभवस्य, गुणद्विषः अस्य, नीचस्य गोचरगतैः, कैः सुखम् आप्यते?

Who would be happy in the company of someone who patronises entire group of wicked people, who is unbridled, who continues with his earlier committed extensive mean acts, who has acquired prosperity only by chance, who hates good qualities and who has gone to the meanest level?

उद्भासिताऽखिलखलस्य, विश्रृङ्खलस्य, प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः, दैवात् अवाप्तविभवस्य, गुणद्विषः अस्य, नीचस्य- all in पु. लिं. ष. वि. ए. व. of

उद्भासिताऽखिलखलः- one who has patronised entire group of wicked people- उद्भासित (=प्रकाशित)- glittered, brightened, seemed like- क. भू. धा. वि.of उद्+ seem like, to shine- (भास्- भासते १ ग. आ. प. to shine), अखिल- adjctv- entire, all खलः- wicked person- उद्भासिताः अखिलाः खलाः येन सः- बहुव्रीहि स., विश्रृङ्खलः- one who is unbridled, without any restraint- वि- अव्यय- prefix implies: devoid of, without, श्रृङ्खला- chain, bridle- विगता श्रृङ्खला यस्य सः- बहुव्रीहि स., प्राग्जातविस्तृतनिजाधमकर्मवृत्तिः -one who is habituated to continue with his own earlier committed extensive meanest acts, -प्राग् (प्राक्)- अव्यय- before, already, जात- born, produced & विस्तृत- expanded- both क. भू. धा. वि. of जन्- जायते- ४ ग. आ. प. to be born, produced & वि+ स्तृ- to expand or spread extensively- (स्तृ- to स्तृणोति, स्तृणुते ५ ग. उ. प. to spread), निज- adjctv -self, one's own, अधम- meanest, very bad, कर्मन्- work, doing, वृत्तिः- habit, attitude, conduct- प्राग् जातम् - प्राग्जातम्, प्राग्जातानि विस्तृतानि निजानि अधमानि कर्माणि- प्राग्जातविस्तृतनिजाधमकर्माणि- composite वि. पू. प. कर्मधारय स. & प्राग्जातविस्तृतनिजाधमकर्मसु वृत्तिः यस्य सः- बहुव्रीहि स., अवाप्तविभवः- one who has acquired prosperity- अवाप्त- having acquired, got- क. भू. धा. वि.of अव+ आप्- to acquire- (आप्- आप्नोति ५ ग. प. प. to get), विभवः- prosperity- वि. पू. प. कर्मधारय स., गुणद्विष्- devoid of virtues, hostile towards good things- गुणः- virtue, merit, द्विष्- be hostile towards, to hate- गुणान् द्वेष्टि इति- उपपद तत्पुरुष स., इदम्- this, नीचः- adjctv-4 mean, low, wicked- person, गोचरगतैः & कैः- both in पु. लिं. तृ. वि. ब. व. of गोचरगतः- गोचर- adjctv- within scope or range of गतः- gone, came into- क. भू. धा. वि.of गम्- गच्छति १ ग. प. प. to go- गोचरे गतः- स. तत्पुरुष स. & कः (किम्)- who सुखम्- happiness, satisfaction, contentment- in न. लिं. प्र. वि. ए. व., आप्यते- कर्मणि प्रयोग प्र. पु. ए. व. of आप्- आप्नोति ५ ग. प. प. to get, obtain, attain, दैवात्- by chance, accidentally, luckily- (दैवम्- fate, destiny, luck)

**आरंभगुर्वी क्षयिणी क्रमेण**
**लघ्वी पुरा वृध्दिमती च पश्चात्।**
**दिनस्य पूर्वार्धपरार्धभिन्ना**
**छायेव मैत्री खलसज्जनानाम्॥६०॥**

खलसज्जनानाम् मैत्री आरंभ-गुर्वी, क्रमेण क्षयिणी, दिनस्य पूर्वार्ध-परार्ध-भिन्ना छाया इव, पुरा लघ्वी, पश्चात् वृध्दिमती च (भवति)॥

The friendship with wicked persons and that with gentlemen is like day's shadows, totally different- as in the first half versus the second half. Friendship with wicked people is great at the start but diminishes slowly with time (like shadows from morning till noon). Friendship with noble people is small at the beginning but grows later ( like shadows from noon to evening.)

खलसज्जनानाम्- ष. वि. ब. व. of खलसज्जन- खलः च सज्जनः च-द्वंद्व स.-खल-wicked person, सज्जन-noble person/ gentleman, मैत्री- स्त्री लिं.-friendship, आरंभ- beginning, commencement, गुर्वी-स्त्री लिं.-(गुरु पु/न. लिं.)-Adjctv-great, heavy, big, enlarged-(also means pregnant women), क्रमेण- slowly-तृ. वि. ए. व. of क्रम- order, sequence, step, performance, क्षयिणी-स्त्री लिं.-(क्षयिन् -पु/न. लिं.)-Adjctv- diminishing, reducing, दिनस्य-of the day-ष. वि. ए. व. of दिन-day, पूर्वार्ध-first-half, परार्ध-second-half, पूर्व-adjctv-earlier, first, पर-adjctv-next, the other, अर्ध-half, पूर्वम् अर्धम् & परम् अर्धम् - both कर्मधारय स. स., पूर्वार्धम् च परार्धम् च -पूर्वार्धपरार्ध- द्वंद्व स.- पूर्वार्धपरार्धयो: भिन्ना इति-पूर्वार्धपरार्धभिन्ना- सप्तमि तत्पुरुष स., भिन्ना- different, separate- & छाया- shadow both in स्त्री. लिं. प्र. वि. ए. व.-भिन्न-क. भू. धा. वि. of भिद्-७ ग. उ. प. भिनत्ति-भिंत्ते to break, separate, इव-अव्यय- like, similar to, लघ्वी-स्त्री लिं.-(लघु पु/न. लिं.)-adjctv-light, less, small, पश्चात्-अव्यय- later, from the back, behind, वृध्दिमती-increasing, growing- स्त्री. लिं. प्र. वि. ए. व. of वृध्दिमत्-वर्त. का. वा. धा. सा. वि. of वृध्-वर्धते १ ग. आ. प. to grow, increase, च- and

**मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तिनाम्।**
**लुब्धकधीवरपिशुना निष्कारणमेववैरिणो जगति॥६१॥**

मृग-मीन-सज्जनानाम्, तृण-जल-संतोष-विहित- वृत्तिनाम्, लुब्धक-धीवर-पिशुनाः निष्कारणम् एव वैरिणः जगति (सन्ति)॥

Deer, fish and noble people live happily on grass, water and contentment (respectively). But for no reason, in this world, they

have enemies like a hunter, a fisherman and a wicked person (respectively).

मृग-deer, मीन- fish, सज्जन- noble or good person, मृगमीनसज्जनानाम्-ष. वि. ब. व. of मृगमीनसज्जन - मृगः च मीनः च सज्जनः च -द्वंद्व स., तृण-grass, जल-water, संतोष-happiness, विहित-comprising, deposited, placed, वृत्तिः- existence, attitude, वृत्तिनाम् - ष. वि. ब. व. , तृणम् च जलम् च संतोषम् च - तृणजलसंतोषम्- द्वंद्व स, तृणजलसंतोषेण विहितम्- तृणजलसंतोषविहितम्- तृ. तत्पुरुष स., तृणजलसंतोषविहिता वृत्तिः - तृणजलसंतोषविहितवृत्तिः- कर्मधारय स., लुब्धकधीवरपिशुनाः - प्र. वि. ब. व. of- लुब्धकधीवरपिशुन -लुब्धक- hunter, धीवर-fisherman, पिशुन-traitor or vile, लुब्धक च धीवर च पिशुनः च- लुब्धकधीवरपिशुन- द्वंद्व स, कारणम्-reason, निष्कारणम्- कारणेन विना, एव-just, alone, merely, वैरिणः- प्र. वि. ब. व. of वैरिन् -enemy, जगति- स. वि. ए. व. of जगत्-the world

**एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये**
**सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।**
**तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये**
**ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥७५॥**

ये स्वार्थान्परित्यज्य परार्थघटकाः एते सत्पुरुषाः (सन्ति)। ये स्वार्थ-अविरोधेन परार्थम्-उद्यमभृतः तु सामान्यः (सन्ति)। ये स्वार्थाय परहितं निघ्नन्ति ते अमी मानव-राक्षसाः (भवति)। ये निरर्थकम् परहितं घ्नन्ति ते तु के न जानीमहे॥

Those who strive to benefit others after sacrificing their own interests are great men. Those who benefit others without ignoring their own needs are the common men. Those who destroy others' well being for their own benefit are demons in human form. However, those who destroy other peoples' well being with no reason whatsoever, we do not know who they are!

ये , ते, परार्थघटकाः, सत्पुरुषाः, मानवराक्षसाः, अमी, के , एते - all पु. लिं. प्र. वि. ब. व. of यद्-who, what, which, तद्-that, he she, it, परार्थघटक-engaged in benefitting others ( पर- other, अर्थ-interest, benefit, पराणाम् अर्थः-

परार्थः -ष. तत्पुरुष स., घटक- adjctv- striving, exerting, परार्थान् घटते or परार्थेभ्यः घटक: -परार्थघटकः - चतुर्थी तत्पुरुष स.)- घट् घटते १ ग. आ. प. to strive, to perform, to carry on, सत्पुरुष-good man, सत्-noble, good, पुरुष-man, person, मानवराक्षस-demon in human form (मानव- human, राक्षस-demon -राक्षसः इव मानवः -उपमानोत्तरपद कर्मधारय स.), अदस्- this, he, she, it, किम्-who, what, which, एतद्-this, he, she, it, स्वार्थान्पु. लिं. द्वि. वि. ब. व. of स्वार्थ -self interest ( स्व- self, one's own, स्वस्य अर्थः ष. तत्पुरुष स.), परित्यज्य - leaving, abandoning- पू. का. वा. ल्यबन्त धा. सा. अव्यय of परि+त्यज् (त्यज्-त्यजति १ ग. प. प. to leave, give up), स्वार्थाविरोधेन-तृ. वि. ए. व. of स्वार्थाविरोध-without hurting self interest, विरोध-contrast, opposition, (न विरोध- अविरोध- नञ्तत्पुरुष स.), उद्यम-effort, diligence, भृत्- one who supports, provides (भृत- क. भू. धा. वि. of भृ-१ & ३ ग. उ. प. भरति-ते, बिभर्ति-बिभृते, to bear, support, तु- अव्यय-on the other hand, but, उद्यमभृतः & सामान्यः पु. लिं. प्र. वि. ए. व. of उद्यमभृत- उद्यमे भृत:- सप्तमी तत्पुरुष स.- engaged in supporting & सामान्य- ordinary or common person, स्वार्थाय- च. वि. ए. व. of स्वार्थ, हित-interest, well-being (क. भू. धा. वि. of हि-हिनोति-५ ग. प. प. to gratify, cast, promote, परहितम्-पराणाम् हितम् -ष. तत्पुरुष स., other's interest, निघ्नन्ति & घ्नन्ति- प्र. पु. ब. व. of नि+हन् & हन् to destroy, kill (हन्-हन्ति २ ग. प. प. to kill), निरर्थक- for no reason, न-no, not, जानीमहे-आ. प. उत्तम. पु. ब. व. of ज्ञा- जानाति-जानीते ९ ग. उ. प.- to know

# 6. सुजनपद्धति - Ways of the Good People

After discussing the qualities of the bad people, Bhartṛhari discusses the ways of the good people.

Good people are not greedy, are honest, kind and well educated. They desire the company of noble people, engage in pursuit of knowledge and are devoted to God. They exhibit courage at the time of calamity, forbearance in prosperity and have deep interest in scriptures.

They are eager to serve the guests and are humble after getting wealthy. They are charitable, truthful and have clean character.

The best temperaments are cultivated with the company of good people.

**लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः**
**सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्।**
**सौजन्यं यदि किं गुणैः सुमहिमा यद्यस्ति किं मण्डनैः**
**सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना॥५५॥**

(यदि) लोभः (अस्ति), चेद् अगुणेन किम्? यदि पिशुनता अस्ति, पातकैः किम्? (यदि) सत्यम् (अस्ति), चेत् तपसा च किम्? यदि शुचि मनः अस्ति, तीर्थेन किम्? यदि सौजन्यम् (अस्ति), गुणैः किम्? यदि सुमहिमा अस्ति, मण्डनैः किम्? यदि सद्विद्या (अस्ति), धनैः किम्? यदि अपयशः अस्ति, मृत्युना किम्?

If one is greedy, is there any other bad quality? If one is cruel, are there other sins? If one is honest, why do any penance? If one has a pure mind, why go on a pilgrimage? If one is kind, what is the need of other good qualities? If one has an excellent reputation, does he need other decorations? If one is well educated, why does he need any wealth? If one is disgraced, why worry about death?

लोभः- greed, covetousness- in पु. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र.. पु. ए. व. of अस्- २ ग. प. प. to be, exist, अगुणेन & मृत्युना- both in पु. लिं. तृ. वि. ए. व. of अगुणः- bad quality- गुणः- quality, virtue, merit- न गुणः- अगुणः- नञ् तत्पुरुष स. & मृत्युः- death, God of death, पिशुन- adjctv- slanderous or backbiting- पिशुनता- backbiting, cruelty, wickedness, महिमा- greatness, glory, शोभना महिमा- सुमहिमा- प्रादि कर्मधारय स.- Exalted success, fame & सद्विद्या- excellent education, knowledge- सत्- adjctv- good, noble, virtuous, विद्या- education- सती विद्या- सद्विद्या- वि. पू. प. कर्मधारय स.- all in स्त्री. लिं. प्र. वि. ए. व., पातकैः & गुणैः- पु/न. लिं. तृ. वि. ब. व. of पातक- sin, crime & गुण- virtue quality, सत्यम्- honesty, truth, शुचि- adjctv- pure, clear, virtuous (मनस्)- mind, heart, अपयशः- failure, disgrace- अप- अव्यय- as a prefix it implies: bad, unworthy, without, यशः (यशस्)- fame, glory- यशः अपकृत्य- अपयशस्- अव्ययीभाव स. & सौजन्यम्- generosity, kindness- all in न. लिं. प्र. वि. ए. व., तपसा & तीर्थेन both- न. लिं. तृ. वि. ए. व. of तपस्- penance, religious austerity, तीर्थम्- holy water, place of pilgrimage, मण्डनैः & धनैः-both in न. लिं. तृ. वि. ब. व. of मण्डनम्- decoration, ornamenting, adorning & धनम्- wealth, चेद्- if, in case, च- and, किम्- a particle of interrogation implying: why, what for, of what use, यदि- if, in case- all अव्ययs

**वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता,**
**विद्यायां व्यसनं स्वयोषिति रतिः लोकापवादात्भयम्।**
**भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलैः**
**एते येषु वसन्ति निर्मलगुणाः तेभ्यो नरेभ्यो नमः॥६२॥**

(नरेभ्यो अथवा महद्भ्यो)
येषु, एते निर्मलगुणाः - सज्जनसंगमे वाञ्छा, परगुणे प्रीतिः, गुरौ नम्रता, विद्यायाम् व्यसनम्, स्व-योषिति रतिः, लोक-अपवादात् भयम्, शूलिनि भक्तिः, आत्मदमने शक्तिः, खलैः संसर्ग-मुक्तिः वसन्ति, तेभ्यः नरेभ्यः (महद्भ्यः) नमः॥

Salutations to those great people, who have pure qualities like, desire for the company of noble people, love for other's good qualities, respect for teachers, interest in acquiring knowledge, love

for one's own wife, fear of public blame, devotion to God, strength for self restraint and freedom from the company of wicked people.
सज्जनसंगमे, परगुणे, गुरौ, विद्यायाम्, योषिति, शूलिनि, आत्मदमने- all स. वि. ए. व. of सज्जनसंगमः- सज्जनानाम् संगमः -ष. तत्पुरुष स.- सत् जनः- सज्जनः noble people, परगुणः -परस्य गुणः- ष. तत्पुरुष स., परः - other- गुण -गुणम्- पु/न. लिं) quality, virtue, गुरुः (पु. लिं) teacher, elder, विद्या (स्त्री. लिं)- knowledge, योषित्-(स्त्री. लिं) -wife, शूलिन्- (पु. लिं) Shiva ( armed with spear),God आत्मदमन- self restraint- आत्मन्- self, दमन- restraint, control आत्मनः दमनः- ष. तत्पुरुष स., वाञ्छा- desire, wish, प्रीतिः-love, नम्रता- obedience, reverence, व्यसनम्- interest, स्व- one's own, रतिः- love, लोक- people, अपवादात् -पं. वि. ए. व. of अपवाद-blame, censuring, भयम्-fear भक्तिः- devotion, शक्तिः- strength, खलैः -तृ. वि. ब. व. of खलः - wicked person, संसर्ग- company, contact, मुक्तिः -relief, liberation, संसर्गात् मुक्तिः- संसर्गमुक्तिः - पं. तत्पुरुष स., एते & निर्मलगुणाः- both पु. लिं, प्र. वि. ब. व. of एतद् -this-he-she-it & निर्मलगुणः-निर्गतम् मलम्- निर्मलम्- प्रादि कर्मधारय स.- pure, निर्मलः गुणः - निर्मलगुणः- वि.पु.कर्मधारय स. , येषु- पु. लिं. स. वि. ब. व. of यद् -who, वसन्ति- प्र. पु. ब. व. of वस्- वसति १ ग. प.प. to inhabit, dwell, तेभ्यः & नरेभ्यः (महद्भ्यः) - both च. वि. ब. व. of तद् - that, he, she, it, नर - man, नमः or नमस् - अव्यय- a bow, salutation

**विपदि धैर्यमथाभ्युदये क्षमा**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम्॥६३॥**

विपदि धैर्यम्, अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि च अभिरुचिः, श्रुतौ व्यसनम्, इदम् महात्मनाम् प्रकृतिसिद्धम् हि (गुणम् भवति)॥

(This combination of) courage at the time of calamity, forbearance in prosperity, expert oratory at an assembly, heroism during war, delight in achieving glory and deep interest in scriptures, is the natural quality of great people.

विपदि, अभ्युदये, सदसि, युधि, यशसि & श्रुतौ- all in स. वि. ए. व. of विपद्- स्त्री. लिं.- calamity, distress, misfortune अभ्युदय- पु. लिं.- rise, prosperity- (अभि+उद्+इ-एति २ ग. प. प. to rise), सदस्-न. लिं.- assembly, meeting, युध्- स्त्री. लिं.-war, battle, यशस्- स्त्री. लिं.- glory, fame & श्रुति- स्त्री. लिं.- Vedic knowledge, धैर्यम्, क्षमा, वाक्पटुता, विक्रमः, अभिरुचिः, व्यसनम्, इदम् & प्रकृतिसिद्धम्- all in प्र. वि. ए. व. of धैर्य- पु/न. लिं.-fortitude, courage, क्षमा- स्त्री. लिं.- patience, forbearance, pardon, वाक्पटुता- स्त्री. लिं.- skill in conversation- वाच्- स्त्री. लिं.- speech, talk, पटु- adjctv- clever, skilful- पटुता- skilfulness, expertise- वाचि पटुता- स. तत्पुरुष स., विक्रम- पु. लिं.-heroism, valour, अभिरुचि -स्त्री. लिं.- taste, liking, delight, व्यसन- न. लिं- addiction, interest, इदम्-न. लिं- this, it & प्रकृतिसिद्ध- न. लिं- inherent, inborn, naturally endowed- प्रकृति- स्त्री. लिं.- nature, सिद्ध- proved, decided- क. भू. धा. वि. of सिध्-सिध्यति ४ ग. प. प. to accomplish, prove- प्रकृत्या सिद्धम्- तृतीया तत्पुरुष स., अथ- अव्यय- now, then, here, च -and महात्मनाम्- पु. लिं. ष. वि. ब. व. of महात्मन्- great person, soul- महान् आत्मा-महात्मा यस्य सः - बहुव्रीहि स., हि- अव्यय- indeed, surely

**प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः**
**प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।**
**अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथा**
**सतां केनोद्दिष्टं विषममसिधारावृतमिदम् ॥६४॥**

प्रदानम् प्रच्छन्नम्, गृहम् उपगते संभ्रमविधिः, प्रियम् कृत्वा मौनम्, सदसि कथनम् च अपि उपकृतेः, अनुत्सेकः लक्ष्म्याम्, निरभिभवसाराः परकथाः, इदम् विषममसिधाराव्रतम् सताम् केन उद्दिष्टम्?

Who has stipulated this strict vow for the noble people? To hide favours done to others, get eager to serve the guests, keep silent after doing pleasant things (for others) but mention in public favours received by you, be humble after becoming wealthy and do not humiliate anyone with fictitious stories. These vows are like sleeping over a sword's edge?

*The answer to this question is that the noble people have imposed these strict behaviours on themselves.*

प्रदानम्, प्रच्छन्नम्, मौनम्, कथनम्, इदम् & उद्दिष्टम्- all in न. लिं. प्र. वि. ए. व. of प्रदान- giving, offering, प्रच्छन्न- well hidden- क. भू. धा. वि. of प्र+ छद्- (छद्- छदति १० ग. प. प. to cover, veil), मौन- silence, कथन- narration, telling, इदम्- this & उद्दिष्ट- prescribed, dictated- क. भू. धा. वि. of उद् + दिश्- (दिश्- दिशति-ते ६ ग. उ. प. to point out, show, गृहम्, प्रियम् विषमम्, असिधाराव्रतम् - न. लिं. द्वि. वि. ए. व. of गृह- house, home, प्रिय- pleasant, helpful, विषम- strenuous, very odd, असिधाराव्रत- sword edge penance when a young couple sleeps with an open sword edge between them for control of passions), असिः (पु. लिं.)- sword, धारा- (स्त्री. लिं.)- edge, व्रत- (पु/न. लिं.)- penance, vow- असेः धारा- असिधारा & असिधारायाः व्रतम्- असिधाराव्रतम्- both ष. तत्पुरुष स., उपगते, सदसि & लक्ष्म्याम्- स. वि. ए. व. of उपगत- one who has come- क. भू. धा. वि. of उप+ गम्- to arrive- (गम्- गच्छति- १ ग. प. प. to go), सदस्- न. लिं.- assembly, or group of people & लक्ष्मी- wealth, riches, संभ्रमविधिः & अनुत्सेकः - पु. लिं. प्र. वि. ए. व. of -संभ्रमविधि- respectful welcome- संभ्रम- पु. लिं- respect, reverence, hurry, विधिः - act, practice, a sacred command- संभ्रमस्य विधिः - ष. तत्पुरुष स. & अनुत्सेक- disinterested, not having pride- अन् उत्सेक- नञ्तत्पुरुष स. -उत्सेक- pride, haughtiness- (सेक्- सेकते १ ग. आ. प. to go, move), कृत्वा- having done- पू. का. वा. त्वान्त धा. सा. अव्यय of कृ- करोति-कुरुते ८ ग. उ. प. to do, च-and, अपि- अव्यय- even, also, and, उपकृतेः - स्त्री. लिं. ष. वि. ए. व. of उपकृति- favour, obligation, निरभिभवसाराः - प्र. वि. ब. व. of निरभिभवसार- पु. लिं- perception of not indulging in humiliation of anyone- निर्-अव्यय- prefix indicates absence, devoid of, अभिभव- insult, humiliation being attacked, सार- essence, perception- निरभिभवस्य सारः & परकथाः- प्र. वि. ब. व. of परकथा- (स्त्री. लिं)- feigned story about other- पर- other, कथा - story, tale- परेषाम् कथा- both ष. तत्पुरुष स., सताम्- पु. लिं. ष. वि. ब. व. of सत्- noble, good, केन- by whom- पु. लिं. तृ. वि. ए. व. of किम्-who

**करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता**
**मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम्**

**हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो:**
**विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्॥६५॥**

प्रकृतिमहताम्, ऐश्वर्येण विना अपि, करे श्लाघ्यः त्यागः, शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी, विजयिभुजयोः अतुलम् वीर्यम्, हृदि स्वच्छा वृत्तिः, श्रवणयोः श्रुतमधिगतम् च, इदम्, मण्डनम् (भवति)॥
For the naturally great people, even without any wealth, each of the following is a real ornament: Praiseworthy charity in the hands, love of teacher's feet on the head, truthfulness in the speech, matchless bravery on the winning shoulders, clean character in the heart and listening to established knowledge of scriptures by ears.

प्रकृतिमहताम्- of people who are born great- पु. लिं. ष. वि. ब. व of प्रकृतिमहत्- प्रकृति- nature, natural form- महत्- great, mighty- प्रकृत्या महान् - प्रकृतिमहत्- तृ. तत्पुरुष स., करे- पु. लिं. स. वि. ए. व. of कर- hand, शिरसि, मुखे & हृदि-all in -न. लिं. स. वि. ए. व. of शिरस्- head, मुख- mouth, face & हृद्- heart, mind, श्लाघ्यः- praiseworthy, respectable- also श्लाघनीय & श्लाघितव्य- कर्मणि वि. धा. सा. वि. of श्लाघ्- श्लाघते १ ग. आ. प. to praise, extol, & त्यागः- charity- both- पु. लिं. प्र. वि. ए. व., गुरुपादप्रणयिता- fond solicitation of teacher's or elder's feet- गुरु- teacher, elder, पाद- foot, प्रणयिता- love, fond solicitation- गुरोः पादौ- गुरुपादौ- ष. तत्पुरुष स. & गुरुपादयोः प्रणयिता- गुरुपादप्रणयिता- ष. तत्पुरुष स., सत्या- truthful, genuine, वाणी- speech, words, स्वच्छा- clean, spotless, वृत्तिः - character, behaviour- all in - स्त्री. लिं. प्र. वि. ए. व., विजयिभुजयोः - पु. लिं. स. वि. द्वि. व. of विजयिभुज- winning arm- विजयिन्- winner, conqueror, भुज- arm- विजयिन: भुजौ- विजयिभुजौ- ष. तत्पुरुष स., अतुलम्- unmatched, incomparable- तुलम्- equal, similar, न तुलम्- अतुलम्- नञ् तत्पुरुष स. & वीर्यम्- bravery, strength, श्रुतम्- learning in general, sacred knowledge, that which is heard- श्रुत- क. भू. धा. वि. of श्रृ- श्रृणोति- ५ ग. प. प. to listen, study, अधिगतम्- acquired, accomplished- अधिगत- क. भू. धा. वि. of अधि+ गम्- (गम्- गच्छति १ ग. प. प. to go), इदम्- this & मण्डनम्- decoration, ornament - all in- न. लिं. प्र. वि. ए. व., श्रवणयोः- -पु/न. लिं. स. वि. द्वि. व. of श्रवण- ear, hearing, ऐश्वर्येण- तृ. वि. ए. व. of ऐश्वर्य- wealth, supremacy, affluence, विना-without, devoid of, अपि- also, even, च-and- all अव्यय

**संपत्सु महतां चित्तं भवत्युत्पलकोमलम्।**
**आपत्सु च महाशैलशिलासंघातकर्कशम्॥६६॥**

महताम् चित्तम् संपत्सु उत्पलकोमलम् भवति। आपत्सु च महा-शैल-शिला-संघात-कर्कशम् (भवति)॥
In prosperity, the mind of great people becomes soft like a lotus. During calamity, it becomes hard like a mass of great mountain solid rock.

महताम्- पु. लिं. ष. वि. ब. व. of महत्- great, noble, चित्तम्- heart, mind, thought, संपत्सु- स.वि. ब. व. of संपद्-स्त्री. लिं- wealth, prosperity, success, उत्पल- lotus, water-lily, कोमल-adjctv- soft (उत्पलम् इव कोमलम्- विशेष्य पु. कर्मधारय स.), भवति- वर्त. प्र. पु. ए. व of भू- भवति- १ ग. प. प. to happen, to be, आपत्सु -स.वि. ब. व. of आपद्- स्त्री. लिं- calamity, failure, distress, महा- great, शैल-mountain, शिला- rock, संघात- assemblage, collection (प्रयोजक क. भू. धा. वि. of सं+हन् -हन्ति २ ग. प. प.), कर्कश- adjctv- hard, rough, (महान् शैलः - महाशैलः - वि.पु.कर्मधारय स.., महाशैलस्य शिला- महाशैलशिला- ष. तत्पुरुष स.- महाशैलशिलाणाम् संघातः- महाशैलशिलासंघातः -ष. तत्पुरुष स., महाशैलशिलासंघातः इव कर्कशः - विशेष्य पु. कर्मधारय स.-hard like a mass of great mountain rock.

**संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते**
**मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।**
**अन्तःसागरशुक्तिकुक्षिपतितं तन्मौक्तिकं जायते**
**प्रायेणाधममध्यमोत्तमजुषामेवंविधाः वृत्तयः॥६७॥**

पाठभेद : प्रायेणाधममध्यमोत्तमगुणा: संसर्गतो देहिनाम्॥

संतप्त अयसि संस्थितस्य पयसः नाम अपि न श्रूयते। तद् एव नलिनीपत्रस्थितम् मुक्ताकारतया राजते। तद् अन्तःसागरशुक्तिकुक्षिपतितम् मौक्तिकम् जायते। प्रायेण अधममध्यमोत्तमजुषाम् एवम् विधाः वृत्तयः (भवन्ति)॥ अथवा - प्रायेण अधममध्यमोत्तमगुणाः देहिनाम् संसर्गतः (भवन्ति)॥

A drop of water on a red-hot iron is not remembered at all. (disappears in no time). The same drop, when held on a lotus leaf,

shines like a pearl! That (water drop) forms a real good pearl when it enters the pearl oyster shell in the ocean. Indeed, the people with bad, good and the best qualities exhibit these behaviours.

*Man, moderate and the best temperaments are results of the company people keep.*

संतप्त- red hot, overheated- क. भू. धा. वि. of सं+ तप्- (तप्- तपति १ ग. प. प. to be hot, अयसि- on the iron- न. लिं. स. वि. ए. व. of अयस्- iron, संस्थितस्य & पयसः- both न. लिं. ष. वि. ए. व. of संस्थित- placed, located- क. भू. धा. वि. of सं+ स्था- (स्था- तिष्ठति १ ग. प. प. to stand, stay) & पयस्- water, नाम, तद्, नलिनीपत्रस्थितम्, अन्तःसागरशुक्तिकुक्षिपतितम् & मौक्तिकम्- all in न. लिं. प्र. वि. ए. व. of नामन्-name, existence, mark, तद्- that, it, नलिनीपत्रस्थित- placed on a lotus leaf- नलिनी- lotus, पत्र- leaf, स्थित- stood, stayed- क. भू. धा. वि. of स्था- तिष्ठति, नलिन्याः पत्रम् -नलिनीपत्रम्- ष. तत्पुरुष स. & नलिनीपत्रे स्थितम्- स. तत्पुरुष स., अन्तःसागरशुक्तिकुक्षिपतित- fallen inside the cavity of a pearl oyster-अन्तः (अन्तर्)- अव्यय- inside, within, सागर- ocean, शुक्ति - (स्त्री. लिं.)- pearl oyster, कुक्षि- cavity, womb, पतित- fallen- (क. भू. धा. वि. of पत्- पतति १ ग. प. प. to fall)- सागरस्य शुक्तिः -सागरशुक्तिः- सागरशुक्तेः कुक्षिः -सागरशुक्तिकुक्षि- सागरशुक्तिकुक्षेः अन्तर् -अन्तःसागरशुक्तिकुक्षि- all ष. तत्पुरुष स., अन्तःसागरशुक्तिकुक्षौ पतितम्- अन्तःसागरशुक्तिकुक्षिपतितम्- स. तत्पुरुष स. मौक्तिक- pearl, अपि- अव्यय-also, even, and, न-no, not, श्रूयते- gets heard- कर्मणि प्रयोग तृ. पु. ए. व. of श्रु-शृणोति ५ ग. प. प. to hear, एव- अव्यय- just, only, मुक्ताकारतया- स्त्री. लिं. तृ. वि. ए. व. of मुक्ताकारता -like a shape of a pearl- मुक्ता- pearl, आकारता- form, shape- मुक्ता इव आकारता- उपमापूर्वपद कर्मधारय स., राजते- shines & जायते- becomes- both वर्त. आ. प. प्र. पु. ए. व. of राज्-राजति-ते -१ ग. उ. प. to shine, glitter & जन्- ४ ग. आ. प. to born, to become, प्रायेण- अव्यय- possibly, perhaps, mostly, एवम्- अव्यय- thus, in this manner, विधाः -categories, वृत्तयः -behaviours & अधममध्यमोत्तमगुणाः- low, moderate and high qualities- all in- प्र. वि. ब. व. of विध-पु. लिं.- type, variety, वृत्ति- स्त्री. लिं. -nature, behaviour & अधममध्यमोत्तमगुण- अधम- low, mean, मध्यम- moderate, middle, उत्तम- top, best, अधमः च मध्यमः च. उत्तम च- अधममध्यमोत्तमः -द्वंद्व स.- अधममध्यमोत्तमनाम् गुणाः - ष. तत्पुरुष स , देहिनाम् & अधममध्यमोत्तमजुषाम्- पु. लिं. ष. वि. ब. व. of देहिन्- person &

अधममध्यमोत्तमजुष्- people with low, moderate and high qualities- जुष्- adjective-at the end of the compound means- resorting, indulging, enjoying संसर्गतः- by contact, company- संसर्ग- contact, तस्- suffix implies:- from that, thence

**यः प्रीणयेत् सुचरितैः पितरं स पुत्रः**
**यद् भर्तुरेव हितमिच्छति तत्कलत्रम्।**
**तन्मित्रमापदि सुखे च समक्रियं यत्**
**एतत् त्रयंजगति पुण्यकृतो लभन्ते॥६८॥**

यः पितरम् सुचरितैः प्रीणयेत्, सः पुत्रः (भवति)। यद् भर्तुः एव हितम् इच्छति तद् कलत्रम् (भवति)। यद् आपदि सुखे च समक्रियम् तद् मित्रम् (भवति)। जगति पुण्यकृतः एतद् त्रयम् लभन्ते॥

One who delights his father (or mother) with good behaviour (character) is a real son. One who desires only for husband's (or wife's) welfare is a real wife (or husband). One who is with you equally in your good and bad times is a real friend. Only those who have done good deeds (in the past) get all three of them in this world.

यः, सः, पुत्रः,& भर्तुः- पु. लि. प्र. वि. ए. व. of यद्-who, तद्- that, he, पुत्र- son, dear child & भर्तृ- husband, पुण्यकृतः--पु. लिं. प्र. वि. ब. व.of पुण्यकृत्- fortunate person- पुण्य- meritorious deed, virtue, कृत्- one who has done- कर्तरि वर्त. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do) येन पुण्यम् कृतम् सः - पुण्यकृत्- बहुव्रीहि स, पितरम् & हितम्- both in द्वि. वि. ए. व. of पितृ- पु. लिं.- father & हितम्- न. लिं- well-being, good life- (हित- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, please, to send forth), कलत्रम्- a wife, समक्रियम्- partner in action/ accomplishment, सम- adjctv -identical, equal, क्रिया- doing, action, accomplishment, समाम् क्रियाम् करोति -समक्रियम्- उपपद तत्पु स., मित्रम्- friend, यद्- which, what, तद्- that, it & एतद्- this- all in - न. लि. प्र. वि. ए. व., सुचरितैः- न. लि. तृ. वि. ब. व. of सुचरितम्- good behaviour, acts - सु- अव्यय- implies good, well, शोभनम् चरितम्- कर्मधारय स., प्रीणयेत्- would please, विध्यर्थ प्र.. पु. ए. व. of प्री- प्रीणाति- प्रीणीते ९ ग. उ. प. to please, delight, एव- अव्यय- like,

similar to, इच्छति- वर्त. प्र. पु. ए. व. of इष्- ६ ग. प. प. to desire, like, long for, आपदि, जगति & सुखे- स. वि. ए. व. of आपद्- स्त्री. लिं. -calamity, disaster, जगत्- world, सुखम्- न. लिं.- happiness, good time, च- and, त्रयम्- न. लिं. प्र. वि, ए. व. of त्रयस्- (nominative plural of त्रि), लभन्ते- वर्त. प्र.. पु. ब. व. of लभ्- लभते १ ग. आ. प. to get

**एको वासः पट्टनं वा वनं वा,**
**एका भार्या वंशजा वा प्रिया वा।**
**एकं मित्रं भूपतिर्वा यतिर्वा**
**एको देवो केशवो वा शिवो वा॥६९॥**

एकः वासः पट्टनम् वा वनम् वा (भवेत्) । एका भार्या वंशजा वा प्रिया वा (भवेत्) । एकम् मित्रम् भूपतिः वा यतिः वा (स्यात्) । एकः देवः केशवः वा शिवः वा (पूजयेत्)॥

(The author's roadmap to success- Focus on a single objective).

Stay either in a city or in a forest. Marry only one woman from a good family or the one you love. Have a single friend who is either a King or an ascetic. Worship a single God, Keśava or Śiva.

**स्वस्थास्तिष्ठत दैवमेव हि परं वृद्धौ क्षये कारणम्॥८९॥**

पाभेः परं=नृणां

आखुः ,नक्तम्, स्वयम् विवरम् कृत्वा. भग्नाशस्य, करण्डपिण्डिततनोः क्षुधा म्लानेन्द्रियस्य भोगिनः मुखे निपतितः। असौ तत् पिशितेन तृप्तः (भोगिनः), सत्वरम्

तेन (विवरेण)पथा एव यात:। (जनाः यूयम्) स्वस्थाः तिष्ठत । दैवम् एव हि (नृणाम्) वृद्धौ क्षये परं कारणम् (भवति)॥

A rat, making a hole at night on its own, fell into the mouth of a coiled up snake, lying in a basket with a fatigued body due to hunger, with no hope (of escape). A snake, after satisfying its hunger, with the flesh (of that rat), quickly escaped through that same hole. (Therefore, you all) stay at peace (composed)! The destiny alone is the main reason for the prosperity or destruction of men.

भग्नाशस्य, करण्डपिण्डिततनोः म्लानेन्द्रियस्य & भोगिनः- पु. लिं. ष. वि ए. व. of भग्नाश- one who has lost hope- भग्न- broken- क. भू. धा. वि. of भंज्- भनक्ति ७ ग. प. प. to break, shattered, आशा- hope, desire- भग्ना आशा यस्य सः- भग्नाशः- बहुव्रीहि स., करण्डपिण्डिततनु- a body coiled up in a basket, करण्ड- basket, box- पिण्डित- coiled, lumped- क. भू. धा. वि. of पिण्ड्- पिण्डते १ आ. प. to lump, तनु- स्त्री. लि.- body- करण्डे पिण्डितः- करण्डपिण्डितः -स. तत्पुरुष स. & करण्डपिण्डिता तनुः यस्य सः- करण्डपिण्डिततनुः- बहुव्रीहि स., म्लानेन्द्रिय- fatigued body- म्लान- fatigued- क. भू. धा. वि. of म्लै- म्लायति १ ग. प. प. to fade, wither, इन्द्रिय- bodily parts- म्लानम् इन्द्रियम् यस्य सः- म्लानेन्द्रियः- बहुव्रीहि स. & भोगिन्- snake, क्षुधा- स्त्री. लिं. तृ. वि. ए. व. of क्षुध्- hunger, नक्तम्- अव्यय- at night, आखुः- rat, निपतितः- fallen- क. भू. धा. वि. of नि+ पत्- (पत्- पतति १ ग. प. प. to fall), असौ- (अदस्)- that, तृप्तः- satiated, contented- क. भू. धा. वि. of तृप्- तर्पति, तृप्यति, तृप्नोति & तृपति- १, ४, ५ & ६ ग. प. प. to be satiated, contented, यात:- gone, passed- क. भू. धा. वि. of या- याति २ ग. प. प. to go- all in- पु. लिं. प्र. वि. ए. व., विवरम्- न. लिं. द्वि. वि. ए. व. of विवर- hole, cavity, कृत्वा- having done- पू. का. वा. धा. सा. त्वान्त अव्यय of कृ- करोति- कुरुते ८ ग. उ. प. to do, मुखे- न. लिं. स. वि. ए. व. of मुख- mouth, पिशितेन- न. लिं. तृ. वि. ए. व. पिशितम्- flesh, तद्- that, परम्- major, utmost, दैवम्- fate, destiny & कारणम्- reason- all in न. लिं. प्र. वि. ए. व., तेन & पथा- पु. लिं. तृ. वि. ए. व., तद्- that & पथिन्- way, road, path, स्वस्थाः- पु. लि. प्र. वि. ब. व. of स्वस्थ- composed, confident, तिष्ठत- आज्ञार्थ द्वि. पु. ब. व. of स्था- तिष्ठति १ ग. प. प. to stay, stand, वृद्धौ & क्षये- स. वि ए. व. of वृद्धि- growth,

prosperity, increase & क्षय- destruction, loss, स्वयम्- of its own, सत्वरम्- quickly, speedily, एव-just,हि- surely, indeed- all अव्ययs,

**खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके**
**वाञ्छन्देशमनातपं विधिवशात् तालस्य मूलं गतः।**
**तत्रोच्चैर्महता फलेन मूर्ध्नि पतता भग्नं सशब्दं शिरः**
**प्रायो गच्छति यत्र भाग्यरहितः तत्राऽऽपदां भाजनम्॥९१॥**

खल्वाटः दिवस-ईश्वरस्य किरणैः संतापितः मस्तके वाञ्छन्, अनातपम् देशम् विधि-वशात् तालस्य मूलं गतः (अस्ति)| तत्र, उच्चैः महता फलेन मूर्ध्नि पतता (तस्य) शिरः स-शब्दम् भग्नम् (अस्ति)। प्रायः भाग्य-रहितः यत्र गच्छति तत्र आपदाम् भाजनम् (भवति)॥

A bald person, (his) head being scorched by the rays of the Lord of the day (Sun), wishing to go to a shady place, by chance, sat below a Palmyra (Tad) tree. A large fruit dropped from the top of the tree and broke his head with a loud sound. (Thus), wherever an unfortunate person goes, he receives his misfortunes.

खल्वाटः -bald person, संतापितः - scorched, afflicted ( क.भू. धा. वि. Of सं+ ताप्- तापयति-ते-causal of तप्-तपति-१ ग. प. प. to heat, गतः - went (क.भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go), शिरः (शिरस्) - head, भाग्यरहितः - unfortunate ( भाग्येन रहितः - तृ. तत्पुरुष स.) all above are in प्र. वि. ए. व., दिवसेश्वरस्य - ष. वि. ए. व. of दिवसेश्वरः - दिवसस्य ईश्वरः - ष. तत्पुरुष स., किरणैः -तृ.वि. ब. व. of किरण - a ray, मस्तके- स. वि. ए. व. of मस्तकः or मस्तकम्- head, वाञ्छन् - wishing- प्र. वि. ए. व. - (वर्त. धा सा. वि. of वाञ्छ्- वाञ्छति - १ ग. प. प.- to wish, desire), अनातपम् - free from hot sun, shade ( न आतपम्- नञ्तत्पुरुष स.), देशम्- place, विधिवशात् -by chance ( विधेः वशात्- ष. तत्पुरुष स.), विधि: - स्त्री Act, action, doing वश (वि)- Subject to, तालस्य- ष. वि. ए. व. of तालः - a Palmyra tree, मूलम्- bottom, base, उच्चैः- तृ. वि. ब. व. of उच्च adjctv- high, elevated, महता – by big, large, फलेन- by fruit and पतता- while falling (वर्त. धा सा. वि. of पत्- पतति १ ग.प. प.) - all three in तृ. वि. ए. व., मूर्ध्नि - पु. लि. स. वि. ए. व. of मूर्धन् -forehead, head, सशब्दम् - with sound- शब्देन सहितम्- सह बहुव्रीहि स., भग्नम् - broken (क. भू. धा. वि. of भंज् - भनक्ति - ७ ग. प. प. to

break, प्रायः - प्रायस् -(अव्यय) mostly, generally, गच्छति- १ ग. प्र. पु. ए. व. of गम्- to go, follow, तत्र -in that place, there and यत्र- in which place, where- both अव्यय, आपदाम्-स्त्री. लिं. ष. वि. ब. व. of आपद् - calamity, misfortune, भाजनम्- sharing, recipient. भाज् - भाजति, भाजते १० उ. To divide, distribute

**रविनिशाकरयोर्ग्रहपीडनं**
**गजभुजङ्गमयोरपि बन्धनम्।**
**मतिमतां च विलोक्य दरिद्रतां**
**विधिरहो बलवानिति मे मतिः॥९२॥**

अहो, गजभुजङ्गमयोरपि बन्धनं, शशिदिवाकरयोर्ग्रहपीडनम्, मतिमतां दरिद्रतां च विलोक्य विधि: बलवान् इति मे मतिः॥

पा.भे.- पूर्वार्ध- गजभुजङ्गविहंगबन्धनं रविनिशाकरयोर्ग्रहपीडनम्।

अहो, गजभुजङ्गमयोः अपि बन्धनम्, शशिदिवाकरयोः ग्रहपीडनम्, मतिमताम् च दरिद्रताम् विलोक्य, विधिः बलवान् इति मे मतिः (भवति)॥

Look here, after seeing elephants and snakes in captivity, the Sun and the Moon tormented (getting eclipsed) by (other) planets and by poverty of intellectuals, I think that Destiny is insurmountable.

अहो- अव्यय- particle showing wonder, surprise, गजभुजङ्गमयोः & शशिदिवाकरयोः -पु. लिं. ष. वि. द्वि. व. of गजभुजङ्गम- elephant and snake- गजः च भुजङ्गमः च & शशिदिवाकर- moon and sun- शशी च दिवाकरः च- both द्वंद्व स., बन्धनम्- captivation, imprisonment & ग्रहपीडनम्- tormenting by planet- ग्रह- planet & पीडन- tormenting, inflicting pain- ग्रहेण पीडनम्- तृ. तत्पुरुष स.- both न. लिं. द्वि. वि. ए. व., मतिमताम्- पु. लिं. ष. वि. ब. व. of मतिमत्- intellectual, knowledgeable person, च दरिद्रताम्- स्त्री. लिं. द्वि. वि. ए. व. of दरिद्रता- poverty- दरिद्र- poor & ता- suffix implies quality, विलोक्य- after observing, seeing- पू. का. वा. ल्यबन्त अव्यय of वि+ लोक्- to behold, observe- (लोक्- लोकते १ ग. आ. प. to see, view), विधिः & बलवान्- both पु. लिं. प्र. वि. ए. व. of विधि- destiny, fate, luck & बलवत्- strong, powerful- बलम्- strength, power- वत्- suffix implies quality, मे (मम)- ष. वि. ए. व. of अस्मद्- I, we, मतिः- mind, thinking,

understanding- स्त्री. लिं. प्र. वि. ए. व., इति- thus, like this & अपि- even, also- both अव्ययs

**सृजति तावदशेषगुणाकरं**
**पुरुषरत्नमलङ्करणं भुवः।**
**तदपि तत्क्षणभङ्गि करोति चे**
**दहह कष्टमपण्डितता विधेः ॥९३ ॥**

(प्रथमथः विधिः) भुवः अशेष-गुण-आकरम् पुरुष-रत्नम् अलङ्करणम् सृजति। तावत् तद् अपि तत् क्षण-भङ्गि चेत् करोति । अहह! विधेः अपण्डितता कष्टम् (इव दृश्यते)॥

(The Creator first) creates a man to be the jewel of the Earth, full of excellent qualities. Then, He makes him very short lived! Alas, it is painful to see the stupidity of the Creator!

भुवः- स्त्री. लिं. ष. वि. ए. व. of भू- earth, globe, land, universe, अशेषगुणाकरम्- अशेष- adjctv- endless, perfect, complete- (शेष- remainder- न शेष- अशेष- नञ् तत्पुरुष स.), गुण- virtue, quality, आकरम्- mine, collection- अशेषम् गुणम्- अशेषगुणम्- वि. पू. प. कर्मधारय स. & अशेषगुणानाम् आकरम्- अशेषगुणाकरम्- ष. तत्पुरुष स., पुरुषरत्नम्- a jewel among men- पुरुषः- man, human, रत्नम्- jewel- पुरुषेषु रत्नम्- पुरुषरत्नम्- स. तत्पुरुष स., अलङ्करणम्- decoration, ornament, सृजति & करोति both- वर्त. प्र. पु. ए. व. of सृज्- ६ ग. प. प. to create, produce & कृ- करोति- कुरुते ८ ग. उ. प. to do, make, तद्- that, it & क्षणभङ्गि- very fragile, transitory, short lived- क्षण- moment, instant, भङ्गिः (भङ्गी)- स्त्री. लिं.- Fragile, breaking- क्षणात् भनक्ति यद् तद्- क्षणभङ्गि- बहुव्रीहि स. विधेः- पु. लिं. ष. वि. ए. व. of विधिः- destiny, fate, creator, अपण्डितता- स्त्री. लिं. प्र. वि. ए. व.- stupidity, thoughtlessness- पण्डित- wise, learned, intelligent- न पण्डित- अपण्डित- stupid- नञ् तत्पुरुष स., चेत्- in case, if, though, कष्टम्- Alas, painful, mischievous, तत्- then, there, अहह-a particle of interjection implying: sorrow, regret, alas, अपि-also, even & तावत्- and then, in the meanwhile, on one's part- all अव्ययs

**पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्**
**नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्।**
**धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणम्?**
**यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः॥९४॥**

यदा करीरविटपे पत्रम् न एव (अस्ति, तदा) वसन्तस्य किम् दोषः? उलूकः यदि दिवा अपि न अवलोकते (तत्र) सूर्यस्य किम् दूषणम्? मेघस्य धाराः चातकमुखे न एव पतन्ति (तर्हि मेघस्य) किम् दूषणम्? विधिना यत् पूर्वम् ललाटलिखितम्, तद् मार्जितुम् कः क्षमः (भवति)?

Is it the fault of the spring season if there is no new sprout on a Bamboo branch? Is that the fault of the Sun if an owl can see nothing even during the daytime? Is that the fault of the cloud if streams of rain do not fall in the mouth of a Cātaka? What is written on one's forehead by destiny, who is capable of undoing that?

करीरविटपे & चातकमुखे- both in पु/न. लिं. स. वि. ए. व. of करीरविटपः- a new sprout or shoot of bamboo- करीरः- shoot of a bamboo, विटपः- branch, a new sprout or shoot- करीरस्य विटपः- करीरविटपः & चातकमुख- mouth of a Chanakya bird- चातकः- a bird supposed to be surviving only by drinking water of falling rain, मुखम्- mouth चातकस्य मुखम्- चातकमुखम्- both ष. तत्पुरुष स., पत्रम्- a leaf, न. लिं. प्र. वि. ए. व., वसन्तस्य, सूर्यस्य & मेघस्य- all in पु. लिं. ष. वि. ए. व. of वसन्तः- the spring, vernal season, सूर्यः- the Sun & मेघः- cloud, दोषः- blame, fault, shortcoming, उलूकः- an owl, कः (किम्)- क्षमः- capable, competent appropriate- all in पु. लिं. प्र. वि. ए. व., अवलोकते- वर्त प्र. पु. ए. व. of अव+ लोक्- to behold, see- (लोक्- लोकते- १ ग. आ. प. to see, view), दूषणम्- a fault, offense, defect- in न. लिं. प्र. वि. ए. व., यद्- which, what, पूर्वम्- adjctv- before, earlier, ललाटलिखितम्- written on the forehead- ललाटम्- forehead & लिखितम्- writing- ललाटे लिखितम्- स. तत्पुरुष स., तद्- that, it- all in न. लिं. द्वि. वि. ए. व., धाराः- in स्त्री. लिं. प्र. वि. ब. व. of धारा- a line of descending fluid, पतन्ति- वर्त. प्र. पु. ब. व. of पत्- पतति १ ग. प. प. to fall, drop, विधिना- in पु. लिं. तृ. वि. ए. व. of विधिः- destiny, fate, मार्जितुम्-to wipe off, cleanse- पू. का. वा. हेत्वर्थक तुमन्त धा. सा. अव्यय of मृज्- मार्ष्टि- २ ग. प. प. to wipe or wash off, cleanse, यदा- when, at which time, यदि- in case,

when, if, अपि- even, also, न- no not, किम्- interrogative particle: what which, how, दिवा- in the day time, एव- just, only merely- all अव्ययs

**मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ्जयत्वाहवे**
**वाणिज्यं कृषिसेवनं च सकला विद्याः कलाः शिक्षतु।**
**आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं**
**नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः॥१०२॥**

(मनुष्यः) अम्भसि मज्जतु, मेरुशिखरम् यातु, आहवे शत्रून् जयतु, वाणिज्यम् कृषिसेवनम् च सकलाः विद्याः कलाः शिक्षतु, प्रयत्नम् कृत्वा खगवत् विपुलम् आकाशम् प्रयातु, परम् इह अभाव्यम् न भवति, कर्मवशतः भाव्यस्य नाशः कुतः (अस्ति)॥

A man may dive deep into water or he may reach the summit of the mount- Meru. He may win over his enemies in the battle. He may acquire all knowledge in arts, commerce or agriculture. By great efforts, he may even fly like a bird in vast skies, but in this world, nothing happens if it is not destined! How can one avoid destiny, based on one's Karma?

*In this Subhāṣita, Bhartṛhari does tie destiny as results of past actions!*

अम्भसि- न. लिं. स. वि. ए. व. of अम्भस्- water, मज्जतु, यातु, प्रयातु, शिक्षतु, जयतु- all आज्ञार्थ प्र. पु. ए. व. of मस्ज्- मज्जति- ६ ग. प. प. to plunge, dip sink, या- याति & प्र+ या- प्रयाति- २ ग. प. प. to go, move, set out, शिक्ष् - शिक्षते १ ग. आ. प. to learn, study, (used as प. प.) जि- जयति- १ प. प. to conquer, defeat, सकलाः- all, entire, विद्याः- knowledge, learning & कलाः- arts- all in स्त्री. लिं. द्वि. वि. ब. व., वाणिज्यम्, कृषिसेवनम्, प्रयत्नम्, विपुलम्, आकाशम् & मेरुशिखरम्- all in- न. लिं. द्वि. वि. ए. व. of, वाणिज्य- trade, commerce, कृषिसेवन- doing agriculture- कृषि- स्त्री. लिं- agriculture, ploughing- सेवनम्- act of serving, doing- कृषेः सेवनम्- ष. तत्पुरुष स., प्रयत्न- effort, exertion, विपुल- adjctv- vast, large, expansive, आकाश- sky & मेरुशिखर- top of mount Meru- मेरु- name of the mountain, शिखर- top, summit- मेरोः शिखरम्- मेरुशिखरम्- ष. तत्पुरुष स.,

कृत्वा- after doing, having done- पू. का. वा. धा. सा. अव्यय of कृ- करोति- कुरुते ८ ग. उ. प. to do, खगवत्- like a bird- खग- bird- खम्- sky, खे गच्छति इति- खगः- उपपद तत्पुरुष स. & वत्- suffix implies quality, अभाव्यम्- न. लिं. प्र. वि. ए. व. of अभाव्य- that is not destined- न भाव्य- अभाव्य- नञ् तत्पुरुष स.- भाव्य- adjctv- about to happen, destined to happen in future- (also भावितव्य & भावनीय- भविष्य. कर्मणि वि. धा. सा. वि. of भू-भवति) , आहवे- स. वि. ए. व. of आहव- battle, war, शत्रून्- पु. लिं. द्वि. वि. ब. व. of शत्रु- enemy, भवति- वर्त. प्र. पु. ए. व. of भू-१ ग. प. प. to be, to exist, भाव्यस्य- ष. वि. ए. व. of भाव्य, नाशः- destruction, end- पु. लिं. प्र. वि. ए. व., कुतः (कुतस्)- where, which way, इह- here, in this world, च- and, न-no, not, परम्- but- all अव्ययs; कर्मवशतः - कर्मेण वशतः - तृ. तत्पुरुष स.- Influenced by Karma or past deeds.

# 10. कर्म पद्धति - Actions & Consequences

The Hindu philosophy strongly believes in Karma and its fruits, similar to the Law of Cause and Effect.

In this chapter, Bhartṛhari has compiled those verses which talk about one's actions and their impact. The previous chapter discussed one's fate based on God's will. This chapter focuses on one's actions and their fruits, now or later!

He commends those who work without worrying about fate or destiny. He considers laziness to be a person's worst enemy.

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥८६॥**

शरीरस्थः आलस्यम् हि मनुष्याणाम् महान् रिपुः (अस्ति)। उद्यम-समः बन्धुः न अस्ति। (कः अपि) यम् कृत्वा न अवसीदति॥

Laziness is the biggest enemy residing in a human body. There is no brother like effort (work, diligence). One does not decay after doing (any) work.

शरीरस्थः residing in the body- शरीरे तिष्ठति इति -उपपद तत्पुरुष स., आलस्यम् - laziness, हि- अव्यय- alone, just, certainly, मनुष्याणाम्- पु. लिं. ष. वि. ब. व. of मनुष्यः-man, person, महान् - huge, big, रिपुः- enemy, उद्यम- effort, work, समः -like, comparable- उद्यमस्य समः - उद्यमसमः -ष. तत्पुरुष स., बन्धुः - brother, relation,अस्ति- प्र. पु. ए. व. of अस् २ ग. प. प. to be, यम्- द्वि. वि. ए. व. of यद् -what, which, कृत्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of कृ. करोति-कुरुते ८ ग. उ. प. to do, अवसीदति- प्र. पु. ए. व. of अव+ सद्- to perish, decay (सद्- सीदति १ ग. प. प. to sit, recline

**कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी।**
**तथापि सुधियश्चार्याः सुविचार्यैव कुर्वते॥९०॥**

पुंसाम् फलम् कर्मायत्तम् (भवति)। (पुंसाम्) बुद्धिः कर्मानुसारिणी (अस्ति)। तथा अपि सुधियः च आर्याः सुविचार्य एव कुर्वते॥

The achievement of men is dependent on their action. Their intellect follows their action. Even then, the wise and great persons act (only) after due consideration.

कर्मायत्तम्, फलम्, बुद्धिः & अनुसारिणी- all प्र. वि. ए. व of कर्मायत्त (न. लिं)- depending on action, कर्मणा आयत्त- तृ. तत्पुरुष स., कर्मन् - action, effort, आयत्त - being in, resting on, dependent on (धातु. सा. नाम of आ+यत् १ ग. आ. प. to strive, attempt), फल (न. लिं) result, fruit, बुद्धि (स्त्री. लिं) intellect, knowledge, अनुसारिन् (स्त्री. लिं), follower, पुंसाम्-ष. वि. ब. व. of पुंस्- man, तथापि- तथा+अपि- still, even then, सुधियः & आर्याः -पु. लिं. प्र. वि. ब. व of सुधी -wise, intelligent & आर्य - respectable, honourable, noble, सुविचार्य-पूर्व. का. वा. धा. सा. अव्यय of सु+वि+चर्- to take into account or to consider thoroughly (चर् चरति १. ग. प. प. to walk, move), एव-अव्यय just, exactly, only, कुर्वते-वर्त. प्र. पु. ब. व. of कृ करोति-कुरुते ८ ग. उ. प. to do

**नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा**
**विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः।**
**फलं कर्मायत्तं यदि किममरैः किञ्च विधिना**
**नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति॥९५॥**

(वयं) देवान् नमस्यामः, ननु ते अपि हतविधेः वशगाः (सन्ति)। विधिः वन्द्यः (किन्तु) सः अपि प्रतिनियतकर्मैकफलदः (अस्ति)। यदि फलम् कर्मायत्तम्, किम् अमरैः ? किम् च विधिना ? नमः तत् कर्मभ्यः, येभ्यः विधिः अपि न प्रभवति॥

We may salute the Gods, but even they are controlled by the cruel destiny. Then, we should salute destiny. But, here again it (destiny) grants success (to those) who work diligently and regularly. If success depends on work, then why (pray to) God?  Moreover, why

(depend on) destiny? (Therefore), we salute (only) those who work whom even destiny cannot control.

नमस्यामः- द्वि. (सामान्य) भविष्य प्र. पु. ब. व. of नम्- नमति-ते १ ग. उ. प. to salute, bow, देवान्- पु. लिं. द्वि. वि. ब. व. of देव-God, हतविधेः-पु. लिं. ष. वि. ए. व. of हतविधिः- cruel destiny- हत- cruel, wretched, miserable- क. भू. धा. वि of हन्- हन्ति २ ग. प. प. to hurt, strike, kill, विधिः- destiny, fate, ते & वशगाः- पु. लिं. प्र. वि. ब. व. of तद्-he & वशग- under influence of- वश- under influence, control- वशे गच्छति इति- वशग- उपपद तत्पुरुष स, वन्द्यः, सः & प्रतिनियतकर्मैकफलदः- all पु. लिं. प्र. वि. ए. व. of वन्द्य- (also वन्दनीय, वन्दितव्य)- to be saluted, respected- कर्मणि वि. धा. सा. वि. of वन्द्- वन्दते १ ग. आ. प. to salute, तद्- he & प्रतिनियतकर्मैकफलद- steady work alone giving success प्रति- अव्यय- towards, by, नियत- steady, positive, definite- क. भू. धा. वि of नि+ यम्- to regulate, control- (यम्- यच्छति-१ ग. प. प. to curb, control), नियतम् नियतम्- प्रतिनियतम्- अव्ययीभाव स., कर्मन्- work, doing, एक- one- कर्म+ एकम्- कर्मैकम्- work alone प्रतिनियतम् कर्मैकम्- प्रतिनियतकर्मैकम्- विशेषणपूर्वपद कर्मधारय स., फल- fruit, result- फलम् ददाति इति- फलदः -उपपद तत्पुरुष स., प्रतिनियतकर्मैकः फलदः- प्रतिनियतकर्मैकफलदः- विशेषणपूर्वपद कर्मधारय स., अमरैः- पु. लिं. तृ. वि. ब. व. of अमर- God- न मर -अमर- नञ् तत्पुरुष स.- deathless, फलम्- fruit, result कर्मायत्तम्- dependent upon work, कर्मन्- work, आयत्तम्- dependent upon, resting with- आयत्त- क. भू. धा. वि of आ+ यत्- (यत्- यतते-१ ग. आ. प. to attempt, try)- कर्मणा आयत्तम्- कर्मायत्तम्- तृ. तत्पुरुष स. & तद्- that, it- all in- न. लिं. प्र. वि. ए. व., कर्मभ्यः- न. लिं. च. वि. ब. व. of कर्मन्- work, doing, येभ्यः- from which/whom- पु/न. लिं. पं. वि. ब. व. of यद्- who, which, विधिः- प्र. वि. ए. व. & विधिना- तृ. वि. ए. व. of विधि- पु. लिं.- destiny, fate, providence, प्रभवति- प्र+भू- to arise, originate, prevail upon (भू- भवति १ ग. प. प. to be, to exist), यदि- if, in case, अपि- even, also, किम्- a particle of interrogation- why?, is it not?, नमः (नमस्)- salutation, a bow, न-no, not, च- and, ननु= किन्तु- but, अव्ययs

**ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे,**
**विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे।**
**रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः**
**सूर्यो भ्राम्यति नित्यमेव गगने, तस्मै नमः कर्मणे॥९६॥**

येन, ब्रह्मा कुलालवत् ब्रह्माण्डभाण्डोदरे नियमितः, येन विष्णुः दशावतारगहने महासङ्कटे क्षिप्तः, येन रुद्रः कपालपाणिपुटके भिक्षाटनम् कारितः, (यस्य प्रभावात्) सूर्यः नित्यम् एव गगने भ्राम्यति, तस्मै कर्मणे नमः॥

Salutations to that (divine) action, which guided Brahma (the Creator), like a potter, to create this entire Universe, which threw Viṣṇu (the sustainer) under great distress of ten painful incarnations, which made Śiva, the destroyer, to wander for alms with a skull as a bowl in his hand and by which the Sun goes around the sky daily !

येन- by whom- पु. लिं. तृ. वि. ए. व. of यद्- who, ब्रह्मा (ब्रह्मन्)- God of creation, Lord Brahma, नियमितः- guided, checked, regulated, appointed- क. भू. धा. वि. of प्रयोजक of नि+ यम्- नियमति- to control- (यम्- यच्छति १ ग. प. प. to curb, control), विष्णुः- God of protection, Lord Vishnu, क्षिप्तः- thrown, hurled, cast- क. भू. धा. वि. of क्षिप्- क्षिपति-ते ६ ग. उ. प. & क्षिप्यति ४ ग. प. प. to throw, cast, रुद्रः- God of destruction, Lord Shiva, कारितः- made to do, forced to do- क. भू. धा. वि. of प्रयोजक of कृ- to cause to do- (कृ- करोति- कुरुते ८ ग. उ. प. to do), सूर्यः- the Sun, कुलालवत्- like a potter- कुलाल- a potter, वत्- suffix implies quality, similarity- all in- पु. लिं. प्र. वि. ए. व., ब्रह्माण्डभाण्डोदरे, दशावतारगहने, महासङ्कटे, कपालपाणिपुटके & गगने- all in स. वि. ए. व. of ब्रह्माण्डभाण्डोदर- cavity containing entire universe, ब्रह्मन्-creator, अण्ड- an egg, often used with reference to world, भाण्डम्- pot, vessel, उदरम्- stomach, belly, cavity- ब्रह्मनः अण्डः- ब्रह्माण्डः, भाण्डस्य उदरम्- भाण्डोदरम् & ब्रह्माण्डस्य भाण्डोदरम्- ब्रह्माण्डभाण्डोदरम्- all ष. तत्पुरुष स., दशावतारगहनम्- a impenetrable forest in the form of ten incarnations- दशन्- ten, अवतारः- incarnation coming down, गहनम्- impenetrable forest, distress, दशानां अवताराणां समाहार: - द्विगु समास -

दशावतारः- . & दशावताराः एव गहनम्- अवधारणा पू. प. कर्मधारय (or रूपक) स., महासङ्कट- great distress- महत्- adjctv- great, big, सङ्कट- distress, difficulty- महान् सङ्कटः- वि. पू. प. कर्मधारय स., कपालपाणिपुटकम्- skull in hand as bowl- कपाल- skull, a beggar's bowl, पाणिः- hand, पुटकम्- bowl, a shallow cavity, पाण्यौ पुटकम्- पाणिपुटकम्- स. तत्पुरुष स. & कपालम् पाणिपुटकम् इव- वि. उ. प. कर्मधारय स. & गगन- sky, भिक्षाटनम्- भिक्षा- alms, अटनम्- wandering- भिक्षया अर्थे अटनम्- भिक्षाटनम्- मध्यम पदलोपी क. स., भ्राम्यति-वर्त. प्र.. पु. ए. व. of भ्रम्- ४ ग. प. प. to go about, roam, also भ्रमति - १ ग. प. प तस्मै & कर्मणे- न. लिं. च. वि. ए. व. तद्- & कर्मन्- work, deed, action नमः (नमस्)- a salutation, bow, नित्यम्- daily, regularly, daily एव- just merely- all अव्ययs

**नैवाकृतिः फलति नैव कुलं न शीलं**
**विद्यापि नैव न च यत्नकृतापि सेवा।**
**भाग्यानि पूर्वतपसा खलु संचितानि**
**काले फलन्ति पुरुषस्य यथैव वृक्षाः॥९७॥**

आकृतिः न एव फलति, कुलम् न एव (फलति), शीलम् न (फलति), विद्या अपि न एव (फलति), यत्नकृता सेवा च अपि न (फलति)। पुरुषस्य पूर्वतपसा संचितानि भाग्यानि खलु, यथा एव वृक्षाः, काले फलन्ति॥

One's (good) appearance alone does not achieve success, not even the family background or the character. Even a good education may not succeed, nor the service rendered with great efforts. Over time, only a person's accumulated fortunes earned earlier by great deeds yield (good) results, just like trees.

आकृतिः- form, figure, appearance, विद्या- education, training, knowledge, expertise, सेवा- service, यत्नकृता- one that is done with effort, exertion- यत्न- effort, endeavour, exertion, कृत- done, performed, carried out- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, act- यत्नेन कृतम्- यत्नकृतम्- तृ. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., कुलम्- family, race, शीलम्- character, behaviour- in न. लिं. प्र. वि. ए. व., वृक्षाः- पु. लिं. प्र. वि. ब. व. of वृक्षः- a tree, पुरुषस्य- in पु. लिं. ष. वि. ए. व. of पुरुषः- a man, person, पूर्वतपसा- in न. लिं. तृ. वि. ए. व. of पूर्वतपस्-

penance done earlier (in earlier birth)- पूर्वम्- earlier before, तपस्- penance, religious observance- पूर्वम् कृतम्- पूर्वकृतम्- वि. पू. प. कर्मधारय स. & पूर्वकृतम् तपस्- पूर्वतपस्- मध्यम पदलोपी कर्मधारय स., संचितानि & भाग्यानि- both in न. लिं. प्र. वि. ब. व. of संचितम्- accumulated, earned- संचित- क. भू. धा. वि. of सं+ चि- to hoard, collect, gather- (चि- चिनोति- चिनुते ५ ग. उ. प. to collect, gather) & भाग्यम्- fortune, luck, merit, काले- in पु. लिं. स. वि. ए. व. of कालः- time, moment, फलति & फलन्ति- वर्त. प्र. पु. ए & ब. व. of फल्-१ ग. प. प. to bear fruit, yield or produce, to be successful, to produce result, न-no, not, एव- just, merely only, अपि- even, also, च-and यथा- like which, thus, खलु- indeed, surely- all अव्ययs

**वने रणे शत्रुजलाग्निमध्ये**
**महार्णवे पर्वतमस्तके वा।**
**सुप्तं प्रमत्तं विषमस्थितं वा**
**रक्षन्ति पुण्यानि पुराकृतानि॥९८॥**

पुराकृतानि पुण्यानि (नरम्)), वने, रणे, शत्रुजलाग्निमध्ये, महार्णवे, पर्वतमस्तके वा सुप्तम्, प्रमत्तम्, विषमस्थितम् वा रक्षन्ति॥

Good deeds done in earlier times protect (a person) in the forest, from an enemy, in water or fire, in a big ocean or on top of a mountain, while sleeping or when careless or when in a trouble.

वने, रणे, शत्रुजलाग्निमध्ये, महार्णवे & पर्वतमस्तके- all in स. वि. ए. व. of वन- forest, रण- battlefield, -शत्रुजलाग्निमध्य-amidst enemy, water or fire- (शत्रु-enemy, जल-water, अग्नि-fire- शत्रुः च जलम् च अग्निः च-शत्रुजलाग्निः- द्वंद्व स. -शत्रुजलाग्नेः मध्यः - शत्रुजलाग्निमध्यः - ष. तत्पुरुष स.), महार्णव- - a big ocean- (अर्णवः- ocean, महान् अर्णवः- कर्मधारय स.) & पर्वतमस्तक- mountain top -पर्वत - mountain, मस्तक-head, top -(पर्वतस्य मस्तकम् -ष. तत्पुरुष स.), वा- अव्यय- or, and, सुप्तम्, प्रमत्तम् & विषमस्थितम् all द्वि. वि. ए. व. of सुप्त- slept, sleeping- क.भू. धा. वि. of स्वप्-स्वपिति २ ग. प. प. to sleep, to fall asleep, प्रमत्त- careless, heedless, intoxicated-क.भू. धा. वि. of प्र+मद्-(मद्-माद्यति ४ ग. प. प. to be mad, intoxicated, drunk) &

विषमस्थित- facing a trouble, amidst danger- विषम- trouble, danger, rough, odd, स्थित- positioned, staying - क.भू. धा. वि. of स्था-तिष्ठति १ ग. प. प. to stand, stay- विषमे तिष्ठति इति - उपपद तत्पुरुष स., पुराकृतानि & पुण्यानि - न. लि. प्र. वि. ब. व. of पुराकृत-done earlier -पुरा-अव्यय-before, in former times, कृत- done, made - क.भू. धा. वि. of कृ-करोति-कुरुते ८ ग. उ. प. to do, make - अव्यय पूर्वपद कर्मधारय स. & पुण्य- good deeds, blessings, रक्षन्ति-वर्त. तृ. पु. ब. व. of रक्ष्-रक्षति १ ग. प. प. to protect, save

**या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः**
**प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात्।**
**तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं**
**हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा माऽकृथाः॥९९॥**

हे साधो, वाञ्छितम् फलम् भोक्तुम् ताम् भगवतीम् सत्क्रियाम् आराधय। या खलान् च साधून् करोति, मूर्खान् विदुषः (करोति), द्वेषिणः हितान् (करोति), परोक्षम् प्रत्यक्षम् कुरुते, हालाहलम् तद् क्षणात् अमृतम् (कुरुते)। व्यसनैः विपुलेषु गुणेषु वृथा आस्थाम् मा अकृथाः॥

Oh Noble Man, to enjoy the desired objects, worship the Divine Goddess called a good deed. She transforms a wicked person into a good one, a stupid man into a wise one, an enemy into a friend, an invisible into visible and a deadly poison instantly into a nectar of immortality. Please do not unnecessarily consider numerous sensory pleasures.

हे साधो- पु. लिं. सं. वि. ए. व. of साधुः- noble or virtuous person, a sage, या- स्त्री. लिं. प्र. वि. ए. व. of यद्-who, खलान्, साधून्, मूर्खान्, हितान्, विदुषः & द्वेषिणः- all in पु. लिं. द्वि. वि. ब. व. of खलः- a wicked or bad person, साधुः- see above, मूर्खः- a stupid person, fool, हितः- desirable, fit or beneficial- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, promote, विद्वस्- learned, wise, knowledgeable & द्वेषिन्- hating, enemy, करोति & कुरुते- प. प. & आ. प. वर्त. तृ. पु. ए. व. of कृ- ८ ग. उ. प. to do, make, परोक्षम्- invisible, absent- अक्ष्णोः परम् & प्रत्यक्षम्- visible, present- अक्ष्णोः प्रतिगतम्- both अव्ययीभाव स., हालाहलम्- a deadly poison, अमृतम्- nectar of immortality, वाञ्छितम्- desired, expected- वाञ्छित-

क. भू. धा. वि. of वाञ्छ्- वाञ्छति १ ग. प. प. to wish, desire & फलम्- fruit, result- all in न. लिं. द्वि. वि. ए. व., तद्- that, it- न. लिं. प्र. वि. ए. व., क्षणात्- न. लिं. पं. वि. ए. व. of क्षणम्- moment, instant, भोक्तुम्- पू. का. वा. हेत्वर्थक तुमन्त धा. सा. अव्यय of भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to enjoy, eat, consume, आस्थाम्, ताम्, भगवतीम् & सत्क्रियाम्- all in स्त्री. लिं. द्वि. वि. ए. व. of आस्था- regard, consideration, confidence, effort, interest, तद्-she, भगवती- venerable glorious, divine, holy & सत्क्रिया- virtuous deed, meritorious work, आराधय- प्रयोजक आज्ञार्थ द्वि. पु. ए. व. of आ+ राध्- आराधयति- ते to propitiate, worship, conciliate- (राध्- राध्नोति ५ ग. प. प. to please, to make ready), व्यसनैः- न. लिं. तृ. वि. ब. व. of व्यसनम्- weak point, addiction, violation, distress, विपुलेषु & गुणेषु- न. लिं. स. वि. ब. व. of विपुलम्- plenty, multiple & गुणम्- attribute, sensory attraction, अकृथाः - सा./ द्वि. भूत. म. पु. ए. व. of कृ, च-and, वृथा- unnecessary, in vain, uselessly, मा- a particle of prohibition- lest, that not- all अव्ययs

**गुणवदगुणवद्वा कुर्वता कार्यमादौ**
**परिणतिरवधार्या यत्नतः पण्डितेन।**
**अतिरभसकृतानां कर्मणामाविपत्ते:**
**भवति हृदयदाही शल्यतुल्यो विपाकः॥१००॥**

कुर्वता पण्डितेन गुणवत् वा अगुणवत् कार्यम् , आदौ यत्नतः परिणतिः अवधार्या।
अतिरभस-कृतानाम् कर्मणाम् हृदयदाही शल्यतुल्यः विपाकः आविपत्तेः भवति ॥

Before doing any good or bad work, a wise acting man should think about its consequences in all respects carefully. The results of acts done in great haste keep piercing the heart like an arrow till death.

गुणः/गुणम् -quality, virtue, excellence, वत् -adjctv-an affix added to nouns to show 'possession' -गुणवत् -adjctv- endowed with virtue, good, of a quality-अगुणवत् -bad, useless- न गुणवत् -नञ्तत्पुरुष स., कार्यम् -न. लिं. द्वि. वि. ए. व. of कार्य-work, act, business-(also करणीय, कर्तव्य & कृत्य)- कर्मणि विध्यर्थ धा. सा. वि. of कृ-करोति-कुरुते ८ ग. उ. प. to do, make, कुर्वता- while doing & पण्डितेन- by a wise- man-both in पु. लिं. तृ. वि. ए. व. of कुर्वत् -doing-वर्त. का. वा. धा. सा. वि. of कृ-करोति &

पण्डित-learned or wise person, यत्न-effort, exertion, attempt-यत्नतः-with effort, with pains, carefully, परिणतिः & अवधार्या-स्त्री. लिं. प्र. वि. ए. व. of -परिणति- consequence, result, transformation & अवधार्य-(अवधारणीय & अवधृत्य)- considered, examined, ascertained, understood -कर्मणि विध्यर्थ धा. सा. वि. of अव+धृ-(धृ-धरति-ते & धारयति-ते १ & १० ग. उ. प. to hold, bear, carry, आदौ-in the beginning, before- स. वि. ए. व. of- आदि-adjctv- first, beginning, अतिरभसकृतानाम् & कर्मणाम् -both पु. लिं. ष. वि. ब. व. of अतिरभसकृत- done in great haste-अति-अव्यय- exceedingly, very, too, excessively, रभस-adjctv- haste, rashness, strong, impetuous, कृत- done-क. भू. धा. वि. of कृ-करोति-अतिरभस- रभस अतिकृत्य- अव्ययीभाव स. & अतिरभसेण कृतम्- तृ. तत्पुरुष स., हृदय-heart, दाहः -burning, morbid heat- दाही-adjctv- causing burning, हृदयम् दहति इति- हृदयदाही- उपपद तत्पुरुष स.-causing heart burns, शल्य- weapon, spear, dart, तुल्य-adjctv-like, similar to-(also तोलनीय & तोलितव्य)-कर्मणि विध्यर्थ धा. सा. वि. of तुल्- १० उभय पद- तोलयति-ते -to weigh, measure-शल्येण तुल्यः- शल्यतुल्यः तृ. तत्पुरुष स., विपाकः-consequence, result, आविपत्तेः -till death- ष. वि. ए. व. of आविपत्तिः - आ-prefix indicates-'till', 'until' -विपत्तिः-स्त्री. लिं- calamity, death, भवति-वर्त. प्र. पु. ए. व. of भू. १ ग. प. प. to be, exist

**स्थाल्यां वैदूर्यमय्यां पचति तिलकणांश्चान्दनैरिन्धनौघैः**
**सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कमूलस्य हेतोः।**
**कृत्वा कर्पूरखण्डान् वृतिमिह कुरुते कोद्रवाणां समन्तात्**
**प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः॥१०१॥**

यः मनुजः इमाम् कर्मभूमिम् प्राप्य तपः न चरति, (सः) मन्दभाग्यः वैदूर्यमय्याम् स्थाल्याम् चन्दनैः इन्धनौघैः तिलकणान् पचति। अर्कमूलस्य हेतोः सौवर्णैः लाङ्गलाग्रैः वसुधाम् विलिखति। (तथा) इह कोद्रवाणाम् समन्तात् कर्पूरखण्डान् कृत्वा वृतिम् कुरुते॥

That unfortunate person, who is born in this land of action but does not practice austerity, is like a person who cooks sesame seeds in a blue-gem studded vessel using heaps of sandalwood. He cultivates the land with a plough made of gold for milkweed roots. He erects a fence around the field of lowly grains with blocks of camphor.

यः (यद्)-who, मन्दभाग्यः- unfortunate, ill-fated- मन्द- adjctv- weak, भाग्यम्- fate, fortune- मन्दम् भाग्यम् यस्य सः- बहुव्रीहि स., मनुजः- मनोः जायते - उपपद तत्पुरुष स -man, person- all in पु. लिं. प्र. वि. ए. व., इमाम्, कर्मभूमिम् & वृतिम्- all in स्त्री. लिं. द्वि. वि. ए. व. of इदम्- she, this, कर्मभूमिः- land of action, motherland- कर्मन्- work, action, भूमिः- land, ground- कर्मणः भूमिः- ष. तत्पुरुष स. & वृतिः- fence, hedge, प्राप्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of प्र+ आप्- to get -(आप्- आप्नोति ५ ग. प. प. to get), तपः (तपस्)- penance, religious austerity- in न. लिं. प्र. वि. ए. व., वैदूर्यमय्याम् & स्थाल्याम्- both in स्त्री. लिं. स. वि. ए. व. of वैदूर्यमयी- वैदूर्य (वैडुर्य)- made of blue gem , मयी (मय)-adjctv- an affix used to indicate: made of /composed of & स्थाली- pot, pan, vessel, अर्कमूलस्य & हेतोः-both ष. वि. ए. व. of हेतुः- purpose, cause, reason & अर्कमूलम्- root of milkweed (रुई in मराठी)- अर्कस्य मूलम्- ष. तत्पुरुष स., चन्दनैः, इन्धनौघैः, सौवर्णैः & लाङ्गलाग्रैः- all in पु/न. लिं. तृ. वि. ब. व. of चन्दनम्- sandalwood इन्धनौघम्- heaps of fuel- इन्धनम्- fuel, ओघम्- heap, multitude, सौवर्णम्- made of gold- सुवर्ण- gold & लाङ्गलाग्रम्- tip of a plough- लाङ्गलम्- a plough, अग्रम्- tip, front- लाङ्गलस्य अग्रम्- ष. तत्पुरुष स., वसुधाम्- in स्त्री. लिं. द्वि. वि. ए. व. of वसुधा- earth, land, चरति, पचति, विलिखति & कुरुते- all in वर्त. प्र. पु. ए. व. of चर्- १ ग. प. प. to act, observe, पच्- १ ग. उ. प. to cook, digest, वि+ लिख्- to scrape scratch- (लिख्- लिखति- ६ ग. प. प. to write) & कृ- करोति कुरुते- ८ ग. उ. प. to do, समन्तात्- from every side- पं. वि. ए. व. of समन्त- adjctv- boundary, entire कोद्रवाणाम्- in पु. लिं. ष. वि. ब. व. of कोद्रवः- a species of grain eaten by poor, तिलकणान् & कर्पूरखण्डान्- both in पु. लिं. द्वि. वि. ब. व. of तिलः- sesame, कणः- grain, a particle- तिलस्य कणः & कर्पूरखण्डः- blocks of camphor- कर्पूर- camphor, खण्डः- piece, block- कर्पूरस्य खण्डः- both ष. तत्पुरुष स., कृत्वा- after doing, making- पू. का. वा. त्वान्त धा. सा. अव्यय of कृ-see above, न-no, not, इह-here, in this world- all अव्ययs

# 11. राज नीति - On Ruler's Conduct

It is the duty of the King to make sure that all his subjects are well taken care of. He should have a proper command structure and good governance.

**शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयाऽऽगमा**
**विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।**
**तज्जाड्यं वसुधाधिपस्य कवयस्त्वर्थं विनाऽपीश्वराः**
**कुत्स्यास्स्युः कुपरीक्षका न मणयो यैरर्घतः पातिताः॥१५॥**

विख्याताः कवयः, शास्त्रोपस्कृतशब्दसुन्दरगिरः, शिष्यप्रदेयागमाः, यस्य प्रभोः विषये निर्धनाः वसन्ति, तद् वसुधाधिपस्य जाड्यम् (भवति)। कवयः तु विना अर्थम् अपि ईश्वराः (भवन्ति)। कुपरीक्षकाः कुत्स्याः स्युः। यैः (ते) पातिताः मणयः न अर्घतः (सन्ति)॥

If famous scholars, who assemble grammatically perfect words with beautiful composition and with wisdom worthy of imparting it to their disciples, live in poverty in any kingdom, then it is due to apathy of the King alone. The scholars are masters even without having any formal wealth. The incompetent examiners (the Kings) should be condemned as they fail to recognise the fallen gems (poor scholars).

शास्त्रोपस्कृतशब्दसुन्दरगिरः, शिष्यप्रदेयागमाः, विख्याताः कवयः, निर्धनाः, ईश्वराः, कुपरीक्षकाः, कुत्स्याः, मणयः & पातिताः- all in पु. लिं. प्र. वि. ब. व. of शास्त्रोपस्कृतशब्दसुन्दरगिर्- grammatically perfect words with beautiful composition- -शास्त्र- any department of knowledge, sacred treatise, उपस्कृत- prepared, assembled, decorated, collected, शब्द- word, sound, सुन्दर- beautiful, charming, गिरः - स्त्री. लिं. प्र. वि. ब. व of गिर् - speech, language-शास्त्रैः उपस्कृता- शास्त्रोपस्कृता- तृ. तत्पुरुष स. & सुन्दराः शब्दाः - शब्दसुन्दराः- विशेषणोत्तरपदकर्मधारय स., शास्त्रोपस्कृताः च शब्दसुन्दराः च- शास्त्रोपस्कृतशब्दसुन्दराः - द्वंद्व स. & शास्त्रोपस्कृतशब्दसुन्दराः

गिरः -शास्त्रोपस्कृतशब्दसुन्दरगिरः- विशेषण पूर्व पद कर्मधारय स., शिष्यप्रदेयागमः- knowledge (precept) worthy of imparting to the disciples- शिष्य- student, disciple, प्रदेय- worth giving, to be imparted, given- क. वि. धा. सा. वि. of प्र+ दा- to grant, give- (दा- यच्छति १ ग. प. प. to give), आगमः- knowledge, sacred learning- शिष्याय प्रदेयम्- शिष्यप्रदेयम्- च. तत्पुरुष स. & शिष्यप्रदेयः आगमः- विशेषणपूर्वपदकर्मधारय स., विख्यातः- famous, renowned- क. भू. धा. वि. of वि+ ख्या- to be well-known- (ख्या- ख्याति- २ ग. प. प. to tell, declare), कविः- poet, scholar, writer in general, निर्धनः- poor, having no wealth- धनम्- wealth, money- निर्धन: - निर्गतं धनं यस्मात् स: - प्रादि बहुव्रीहि स., ईश्वरः- lord, master, कुपरीक्षकः- incompetent examiner- कु- अव्यय- affix implies bad, poor, परीक्षकः- examiner, tester, कुत्सितः परीक्षकः- कुपरीक्षकः- प्रादि कर्मधारय स., कुत्स्यः- to be condemned, censured- (also कुत्स्यनीय & कुत्स्यितव्य)- क. वि. धा. सा. वि. of कुत्स्- कुत्सयति- ते १० ग. उ. प., मणिः- gem & पातितः- made to fall down, brought down- पातित- क. भू. धा. वि. of प्रयोजक of पत्- पातयति- ते -(पत्- पतति १ ग. प. प. to fall, drop), यस्य, प्रभोः & वसुधाधिपस्य- all in पु. लिं. ष. वि. ब. व. of यद्- who, प्रभुः- master, lord, owner, ruler & वसुधाधिपः- King- वसुधा- land, earth, ground, अधिपः- lord, master- वसुधायाः अधिपः- वसुधाधिपः- ष. तत्पुरुष स, विषये- in पु. लिं. स. वि. ए. व. of विषयः- land, country, वसन्ति- वर्त. प्र. पु. ब. व. of वस्- वसति १ ग. प. प. to dwell, live, stay, तद्- that, it, जाड्यम्- sluggishness, apathy, inactivity & अर्थम्- wealth, money- all in न. लिं. प्र. वि. ए. व., स्युः- विध्यर्थ प्र. पु. ब. व. of अस्- अस्ति २ ग. प. प. to be, to exist, यैः- पु. लिं. तृ. वि. ब. व. of यद्- who, अर्घतः- from getting the price- (अर्घः- price, value & तस्- suffix implies 'from', towards), तु- but, on the other hand, न- no, not, विना- without, devoid of, अपि- also, even- all अव्ययs

**राजन् दुधुक्षसि यदि क्षितिधेनुमेतां**
**तेनाद्य वत्समिव लोकममुं पुषाण।**
**तस्मिंश्च सम्यगनिशं परिपोष्यमाणे**
**नानाफलैः फलति कल्पलतेव भूमिः॥४६॥**

राजन्, यदि एताम् क्षितिधेनुम् दुधुक्षसि, तेन अद्य वत्सम् इव लोकम् अमुम् पुषाण। तस्मिन् सम्यग् अनिशम् परिपोष्यमाणे, (सा) भूमिः कल्पलता इव च नानाफलैः फलति॥

Oh King, if you wish to milk this land like a cow, then nurture its subjects like a calf today. If constantly well taken care of, this land will yield multitudes of results like a wish-granting creeper.

राजन्- Oh King -पु. लिं. सं. वि. ए. व., एताम् & क्षितिधेनुम्- स्त्री. लिं. द्वि. वि. ए. व. of एतद्- this & क्षितिधेनु- Earth in the form of a cow- क्षितिः- earth, land, धेनु- cow- क्षितिः धेनुः इव- उपमानोत्तरपदकर्मधारय स., दुधुक्षसि- क वर्त. द्वि. पु. ए. व. of दुह्- दुधुक्षति-ते २ ग. उ. प. to milk, to extract), तेन- पु/न. लिं. तृ. वि. ए. व. of तद्- he, it, that, वत्सम्, लोकम् & अमुम्- पु. लिं. द्वि. वि. ए. व. of वत्सः- calf, young one of an animal, boy, son, लोकः- people, subject & अदस्- that, he, पुषाण- आज्ञार्थ द्वि. पु. ए. व. of- पुष्- पुष्णाति ९ ग. प. प. to nurture, bring up, develop, तस्मिन् & परिपोष्यमाणे- पु/न. लिं. स. वि. ए. व. of तद्- he, it, that & परिपोष्यमाण- being well taken care of- कर्तरि वर्त. का. वा. धा. सा. वि. of परि+ पुष्- to well take care of- (पुष्- पोषयति- १० ग. उ. प), कल्प- an idea, लता- creeper; कल्पलता- wish granting creeper- स्त्री. लिं. द्वि. वि. ए. व. & भूमिः- earth, land- both in स्त्री. लिं. प्र. वि. ए. व., नानाफलैः- न. लिं. तृ. वि. ब. व. of नानाफलम्- varieties of fruit, multiple benefits- नाना- अव्यय- varieties of, many, multiple- फलम्- fruit, result- फलम् नानाकृत्य- नानाफलम्- अव्ययीभाव स., फलति- वर्त. तृ. पु. ए. व. of फल्- १ ग. प. प. to bear fruit, yield, यदि- if, in case, च- and, इव- like, similar to, अद्य- today, now, सम्यक्- properly, well, correctly, अनिशम्- ceaselessly, constantly- all अव्ययs

**सत्याऽनृता च परुषा प्रियवादिनी च**
**हिंस्रा दयालुरपि चार्थपरा वदान्या।**
**नित्यव्यया प्रचुरनित्यधनागमा च**
**वेश्याङ्गनेव नृपनीतिर् अनेकरूपा॥४७॥**

नृपनीतिः वेश्याङ्गना इव - सत्या अनृता च, परुषा प्रियवादिनी च, हिंस्रा दयालुः अपि च, अर्थपरा वदान्या, नित्यव्यया, प्रचुर-नित्य-धन-आगमा च अनेकरूपा (भवति)॥

The policy of a ruler is like a multifaceted prostitute woman. It can be truthful and deceptive, rude and sweet-talking, cruel and compassionate, greedy and generous, constantly spending or constantly collecting plentiful wealth.

नृपनीतिः- policy of a ruler- नृप- पु. लिं- king, नीतिः- स्त्री. लिं.- policy, scheme, political wisdom, सत्या- truthful, honest, अनृता- false, deceptive, परुषा- harsh, abusive, rugged, प्रियवादिनी- sweet-talking- प्रिय- adjctv- pleasant, desirable- प्रिया वादिनी - प्रियवादिनी - विशेषणपूर्वपद कर्मधारय तत्पुरुष स, हिंस्रा- cruel, hurtful, दयालुः- compassionate, kind, अर्थपरा- one who is after the money- अर्थ- wealth, money, पर- absorbed or engrossed in, solely devoted to- अर्थस्य पर- अर्थपर- ष. तत्पुरुष स., वदान्या- generous, liberal, bountiful, नित्यव्यया- नित्य- adjctv- constant, perpetual & व्यय- adjctv- spending, giving out- नित्यम् व्ययम्- नित्यव्ययम्- विशेषणपूर्वपद कर्मधारय स., प्रचुरनित्यधनागमा- constantly after collection of plentiful wealth- प्रचुर- adjctv- plenty, ample, धन-money, wealth, आगम- acquisition, appearance, प्रचुरम् च नित्यम् च- प्रचुरनित्यम्- द्वंद्व स.- प्रचुरनित्यम् धनम्- प्रचुरनित्यधनम्- विशेषणपूर्वपद कर्मधारय स. & प्रचुरनित्यधनस्य आगमः- प्रचुरनित्यधनागमः- ष. तत्पुरुष स., वेश्याङ्गना- prostitute woman- वेश्या- prostitute, courtesan, अङ्गना- woman, female- वेश्या अङ्गना- विशेषणपूर्वपद कर्मधारय स., अनेकरूपा- multifaceted- एक-one, single- अन् एक- अनेक- नञ् तत्पुरुष स. & अनेकाः रूपाः - वि.पू.पद कर्मधारय स - all in स्त्री. लिं. प्र. वि. ए. व.,च- and, इव- like, अपि-also, even- all अव्ययs

**आज्ञा कीर्तिः पालनं ब्राह्मणानां ,**
**दानं भोगो मित्रसंरक्षणं च।**
**येषामेते षड्गुणा न प्रवृत्ताः**
**कोऽर्थस्तेषां पार्थिवोपाश्रयेण॥४८॥**

पार्थिव, आज्ञा, कीर्तिः, ब्राह्मणानाम् पालनम्, दानम्, भोगः, मित्रसंरक्षणम् च एते षड्गुणाः येषाम् (पार्थिवानाम्) न प्रवृत्ताः, तेषाम् उपाश्रयेण कः अर्थः(स्यात्) ?
Oh King, If the following six virtues, - proper command, creating reputation, looking after the educated class, generosity in giving,

good governance and protection of friends- are absent in (rulers), then, what is the purpose of depending on them ?

पार्थिव- Oh King- पु. लिं. सं. वि. ए. व., आज्ञा- order, command & कीर्तिः- fame, glory, renown- both स्त्री. लिं. प्र. वि. ए. व., भोगः- enjoyment, utility, revenue, governing, ब्राह्मणानाम्, येषाम् & तेषाम्- all in- पु. लिं. ष. वि. ब. व. of ब्राह्मणः- a theologian, a person belonging to priestly class or first of the four original casts, यद्- who & तद्- he, पालनम्- protection, maintenance, looking after दानम्- charity, benevolence, मित्रसंरक्षणम्- protection of a friend- मित्रम्- friend, protection- मित्रस्य संरक्षणम्- मित्रसंरक्षणम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., एते, षड्गुणाः, प्रवृत्ताः- all in पु. लिं. प्र. वि. ब. व. of एतद्- this, षड्गुणः- षड्- six, गुणः- quality, virtue- षड् गुणाः- षडानां गुणानां समाहारः - द्विगु समास & प्रवृत्तः- well established, manifested, settled- क. भू. धा. वि. of प्र+ वृत्- (वृत्- वर्तते १ ग. आ. प. to exist, to be, to be available), उपाश्रयेण- पु. लिं. तृ. वि. ए. व. of उपाश्रय- support, reliance, dependence upon, कः- what, अर्थः- purpose, meaning- both in पु. लिं. तृ. वि. ए. व., च- and, न- no, not

**न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम्।**
**होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥५७॥**

चण्डकोपानाम् भूभुजाम् न कश्चित् आत्मीयः नाम (भवति)। पावकः स्पृष्टः (सन्), जुह्वानम् होतारम् अपि दहति॥

No one stays close to Kings with violent tempers. A fire burns even the priest if he touches it while conducting the sacrificial rites.

चण्डकोपानाम् & भूभुजाम्- both in पु. लिं. ष. वि. ब. व. of चण्डकोपः- a person of violent temper- चण्ड- adjctv- violent, fierce, hot- कोपः- anger, wrath- चण्डः कोपः - चण्डकोपः- कर्मधारय स. & भूभुजः-king, ruler- भूः- land, earth, भुवम् भुनक्ति इति- भूभुजः- उपपद तत्पुरुष स., कश्चित्- (कः चित्)- someone, anyone, न कश्चित्-none, no one, आत्मीयः (आत्मकीयः)- adjctv- one who is close to, one's own, of kin- (आत्मन्- self, one's own), पावकः- fire, स्पृष्टः- touched- क. भू. धा. वि. of स्पृश्- स्पृशति ६ ग. प. प. to touch, lay hand on- all in पु. लिं. प्र. वि. ए. व., जुह्वानम् & होतारम्-

both in पु. लिं. द्वि. वि. ए. व. of जुह्वानः- one who is conducting yajnya (putting offerings in fire)- वर्त. का. वा. धा. सा. वि. of हु- जुहोति ३ ग. प. प. to make offerings to a deity by placing it in the sacred fire & होतृ- a priest conducting yajnya, दहति- वर्त. प्र. पु. ए. व. of दह्- १ ग. प. प. to burn, scorch, अपि- even, also, नाम- named, called, indeed, truly, perhaps- both अव्ययs

# 12. संकीर्ण - Miscellaneous

This chapter includes verses on many different subjects. These include thoughts about the decline of good quotes, his love, the rain-thirsty bird, some questions and answers etc.

**बोद्धारो मत्सरग्रस्ता: प्रभव: स्मयदूषिता:।**
**अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥१॥**

बोद्धारः मत्सरग्रस्ता: (सन्ति), प्रभव: स्मयदूषिता: (सन्ति), अन्ये च अबोधोपहस्ताः (भवन्ति)। (तस्मात् कारणात्), सुभाषितम् अङ्गे जीर्णम् (भवति)॥

Scholars are jealous of each other. Powerful people are arrogant. In addition, rest of the people are ignorant. Therefore, a beautiful quote- सुभाषित- withers in its own body (without spreading further).

बोद्धारः, मत्सरग्रस्ता:, प्रभव:, स्मयदूषिता:, अबोधोपहस्ताः, अन्ये - all in पु. लिं. प्र. वि. ब. व. of बोद्धृ- (विद्वस्)- intellectual, knowledgeable person, मत्सरग्रस्त- person full with jealousy, intolerance- मत्सर- jealousy, intolerance, ग्रस्त- affected, suffering from- क. भू. धा. वि. of ग्रस्- ग्रसते १ ग. आ. प. to seize, eat up, swallow- मत्सरेण ग्रस्तः- तृ. तत्पुरुष स., प्रभु- the master, person holding control, स्मयदूषित- suffering from arrogance, स्मय- arrogance, pride- दूषित- polluted, troubled- स्मयेन दूषितः- तृ. तत्पुरुष स., अबोधोपहत- suffering from ignorance, stupidity, अबोध- ignorance, stupidity, उपहत- struck, hurt, injured- क. भू. धा. वि. of उप+ हन्- (हन्- हन्ति २ ग. प. प. to strike, kill)- अबोधेन उपहतः- तृ. तत्पुरुष स., अन्य- other, another, सुभाषितम्- noble thoughts, well- said quotes- सु- prefix means: good, well, noble- भाषित- thing that said, quoted- क. भू. धा. वि. of भाष्- भाषते १ ग. आ. प. to say, speak & जीर्णम्- जॄ(दीर्घ)- १, ४ & ९ प. प., १० उ. प. - जरति, जीर्यति, जृणाति, जारयति- ते, to wear out, wither, grow old- both in न. लिं. प्र. वि. ए. व., अङ्गे- पु/न. लिं. स. वि. ए. व. of अङ्ग- body.

**यां चिन्तयामि सततं मयि सा विरक्ता,**
**साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।**
**अस्मत्कृते च परितुष्यति काचिदन्या,**
**धिक् तां च तं च मदनं च इमां च मां च॥२॥**

याम् (अहम्) सततम् चिन्तयामि, सा मयि विरक्ता (अस्ति) | सा अपि अन्यम् जनम् इच्छति। सः जनः अन्यसक्तः (अस्ति)। काचित् अन्या, अस्मत् कृते च परितुष्यति। धिक् ताम् च तम् च मदनम् च इमाम् च माम् च॥

The woman, of whom I think of constantly, is not affectionate with me. She also longs for somebody else, who is interested in some other woman, who is in love with me (for whom I do not care). Shame on her, him, her and me, (but most of all) on the God of Love (Madan)!

*This is supposed to be the incident, which lead Bhartṛhari (then king of Ujjain) to Vairagya. Legend says that he received a celestial fruit, which he gave to his beloved wife, Pingala. She was in love with Ashvapal, so she gave it to her lover. Ashvapal again passed it to another woman Rajnartaki who was in love with the King, so she gave it back to the King again. As the fruit completed this cycle, Bhartṛhari learned about the infidelity of world around him. He left the kingdom and turned into an ascetic.*

याम्, ताम्, तम्, मदनम्, इमाम्, माम् - द्वि. वि. ए. व. of यद्-(स्त्री. लिं.) who & तद् -(स्त्री. लिं)- she, तद्-he (पु. लिं.), मदन-(पु. लिं.) God of Love (Madam), इदम्-this woman & अस्मद्- I, सततम्- अव्यय-constantly, eternally, always, चिन्तयामि-वर्त. उ. पु. ए. व. of चिन्त्-चिन्तयति-ते १० ग. उ. प. to think, ponder over, remember, सा-she-(स्त्री. लिं) & सः -he-(पु. लिं) of तद्, मयि- in me-स. वि. ए. व. & अस्मत्- ours पं. वि. ब. व. of अस्मद्- I, we, विरक्ता-स्त्री. लि. प्र. वि. ए. व. of विरक्त- disenchanted, disaffected- क. भू. धा. वि. of वि+रंज्- (रंज्-रजति-ते १ ग. उ. प. & रज्यति-ते ४ ग. उ. प.- to fall in love, enamoured of, to be affectionate) अपि-अव्यय-also, even, and, अन्यम् & जनम्- पु. लिं. द्वि. वि. ए. व. of अन्य-the other & जन-person, इच्छति & परितुष्यति-वर्त. प्र. पु. ए. व. of इष्- ६ ग. प. प. to desire, want & परि+तुष्- to be very delighted, pleased- (तुष्-तुष्यति ४

ग. प. प.), अन्यसक्तः-पु. लिं. प्र. वि. ए. व. of अन्यसक्त-interested in someone else.-अन्य-the other, someone else, सक्त- attached, interested-क. भू. धा. वि. of संज्-सजति १ ग. प. प. to stick, attach- अन्ये सक्तः -स. तत्पुरुष स., का-स्त्री. लिं. प्र. वि. ए. व. of किम्-who, का+चित्-someone (woman), अन्या-स्त्री. लिं. प्र. वि. ए. व. of अन्य-other, कृते-स. वि. ए. व. of कृत-in favour, done- क. भू. धा. वि. of कृ-करोति-कुरुते८ ग. उ. प. to do, च-and, धिक्-अव्यय-an interjection of censure, Shame, What a pity!

**शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं**
**महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।**
**अधो गङ्गा सेयं पदमुपगता स्तोकमथवा**
**विवेकभ्रष्टानां भवति विनिपातः शतमुखः॥१०॥**

सा इयम् गङ्गा अधः स्तोकम् पदम् उपगता -स्वर्गात् शिरः शार्वम्, पशुपतिशिरस्तः क्षितिधरम्, उत्तुङ्गात् महीध्रात् अवनिम्, अवनेः च अपि जलधिम्। अथवा विवेकभ्रष्टानाम् विनिपातः शतमुखः भवति॥

This Ganga (river) underwent fall little by little, from the heaven to the head of Shiva, from His (Pashupati's) head to the mountain, from that mighty mountain to earth (plains) and then from the land to the sea. Similarly, the people who have lost discretion face hundreds of downfalls like these.

स्वर्गात्, उत्तुङ्गात्, महीध्रात् & अवनेः- all in पं. वि. ए. व. of स्वर्ग- पु. लिं.- heaven, उत्तुङ्ग- adjctv- lofty, high, महीध्र (महीधर)- पु. लिं.- mountain- मही- स्त्री. लिं.-Earth, land- महीम् धारयति इति -महीधरः or महीध्रः- उपपद तत्पुरुष स. & अवनि- स्त्री. लिं.- Earth, land, शार्वम्, क्षितिधरम्, अवनिम्, जलधिम् & पदम् -all in- द्वि. वि. ए. व. of शार्वम्- न. लिं.- belonging to or of शर्वः- शिवः, शंकरः, क्षितिधर- mountain- क्षिति- स्त्री. लिं.- earth, धर- holder, क्षितिम् धारयति इति- क्षितिधरः- उपपद तत्पुरुष स., अवनि-earth, जलधि- sea, ocean- जल-water- जलम् धियति इति- जलधि- उपपद तत्पुरुष स. & पद-position, stage, शिरस्- न. लिं.- head , पशुपतिशिरस्तः- from the head of पशुपति- (शिवः, शंकरः), पशुपतेः शिरस् -पशुपतिशिरस् तः (तस्)- suffix indicates 'of', 'from', च- and, अपि- also even, सा (तद्) - she, इयम्-

(इदम्)- this, गङ्गा- name- Ganges & उपगता- undergone- (उपगत- undergone, come to- क. भू. धा. वि. of उप+ गम्- गच्छति-१ ग. प. प. to go)- all स्त्री. लिं. प्र. वि. ए. व. अधः (अधस्)- अव्यय- lower, below, down, स्तोकम्- adjctv- little, small, अथवा- अव्यय- Is it not so? विवेकभ्रष्टानाम्- पु. लिं. ष. वि. ब. व. of विवेकभ्रष्ट- विवेक- discretion, judgement, भ्रष्ट- fallen, deviated- क. भू. धा. वि. of भ्रंश्- १ ग. आ. प. भ्रंशते & ४ ग. प. प. भ्रश्यति to fall, deviate- विवेकात् भ्रष्टः - पं तत्पुरुष स., विनिपातः & शतमुखः- पु. लिं. प्र. वि. ए. व. of- विनिपात- a great fall, drop- पात-fall- (पत्-पतति १ ग. प. प. to fall- वि+ नि+पत्) & शतमुख- hundredfold- शतम्- hundred, मुखम्- countenance, front, face- शतम् मुखम्- कर्मधारय स., भवति- वर्त. तृ. पु. ए. व. of भू- १ ग. प. प. to be, to exist

**दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनाद्**
**विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्।**
**ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयान्-**
**मैत्री चाप्रणयात् समृद्धिरनयात् त्यागप्रमादाद्धनम्॥४२॥**

दौर्मन्त्र्यात् नृपतिः, सङ्गात् यतिः, लालनाद् सुतः, अनध्ययनात् विप्रः, कुतनयात् कुलम्, खलोपासनात् शीलम्, मद्यात् ह्रीः, अनवेक्षणात् कृषिः, प्रवासाश्रयात् स्नेहः अपि, अप्रणयात् मैत्री, अनयात् समृद्धिः, त्यागप्रमादात् धनम् च विनश्यति॥

A King with bad advice, a sage with (bad) company, a pampered child, a learned man without ongoing study, a family with a bad son, one's character by wicked people, self-respect under influence of liquor, agriculture without proper tending, love while staying away by travelling, friendship without affection, prosperity without management and donating wealth carelessly, all these are (eventually) destroyed.

नृपतिः- king,- नृ- man, पतिः- lord, master, husband- नृणां पतिः- ष. तत्पुरुष स., यतिः- monk, ascetic, सुतः- child, son, विप्रः- a wise-man, learned man, person belonging to priestly class & स्नेहः- affection, love- all in पु. लिं. प्र. वि. ए. व., कुलम्- family, race, शीलम्- character, behaviour, धनम्- wealth, money- all in न. लिं. प्र. वि. ए. व., ह्रीः- shame, dignity, कृषिः- agriculture, husbandry, मैत्री- friendship, amicability &

समृद्धिः- prosperity, wealth, abundance- all in स्त्री. लिं. प्र. वि. ए. व.; दौर्मन्त्र्यात्, सङ्गात्, लालनाद्, अनध्ययनात्, कुतनयात्, खलोपासनात्, मद्यात्, अनवेक्षणात्, प्रवासाश्रयात्, अप्रणयात्, अनयात् & त्यागप्रमादात्- all in पं. वि. ए. व. of दौर्मन्त्र्यम्- न. लिं- evil advice, bad council, सङ्गः- पु. लिं- company with, contact, coming together, लालनम्- न. लिं.- over-indulging, fondling too much, pampering, अनध्ययनम्- न. लिं.- non- study- अध्ययनम्- learning, study, न अध्ययनम्- अनध्ययनम्- नञ् तत्पुरुष स., कुतनयः- पु. लिं.- a bad son- तनयः- son or male descendant- कुत्सितः तनयः- कुतनयः- प्रादि कर्मधारय स., खलोपासनम्- न. लिं.- engaging in bad company- खलः- wicked person, उपासनम् (उपासना)- waiting upon, service, worship- खलस्य उपासनम्- खलोपासनम्- ष. तत्पुरुष स., मद्यम्- न. लिं.- wine, spirituous liquor, अनवेक्षणम्- न. लिं.-not attending to, not caring- अवेक्षणम्- taking care of, attending to- न अवेक्षणम्- अनवेक्षणम्- नञ् तत्पुरुष स., प्रवासाश्रयः- पु. लिं.- staying away while on travel- प्रवासः- travel, journey, आश्रयः- stay, resting place- प्रवासे आश्रयः- प्रवासाश्रयः- स. तत्पुरुष स., अप्रणयः- पु. लिं.- absence of love- प्रणयः- love, affection, न प्रणयः- अप्रणयः- नञ् तत्पुरुष स., अनयः- पु. लिं.- non- management- नयः- policy, statesmanship- न नयः- अनयः- नञ् तत्पुरुष स. & त्यागप्रमादः- पु. लिं.- त्यागः- giving up, leaving, प्रमादः- carelessness, negligence- त्यागे प्रमादः- सप्तमी तत्पुरुष स., विनश्यति- वर्त. प्र. पु. ए. व. of वि+ नश्- to get destroyed, perished- (नश्- नश्यति ४ ग. प. प. to get lost, perish), अपि- even, also, च-and- both अव्ययs

**मणिः शाणोल्लीढः समरविजयी हेतिनिहतो**
**मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः।**
**कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता**
**तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः॥४४॥**

मणिः शाणोल्लीढः, समरविजयी हेतिनिहतः, नागः मदक्षीणः, सरितः शरदि श्यानपुलिनाः, चन्द्रः कलाशेषः, बालवनिता सुरतमृदिता (तथा) नृपाः अर्थिषु गलितविभवाः, तनिम्ना शोभन्ते॥

A jewel rubbed on a touch stone, a winning warrior injured by weapons, a tired elephant tired in rut, an autumn river shrunk to a

sandy bank, a waning moon, a young woman tired after making love, Kings with lost wealth after giving it to seekers, appear splendid in their weaknesses.

मणिः- a jewel, , gem, शाणोल्लीढः- polished on the polishing machine- शाणम्- a touchstone, polishing machine उल्लीढः- polished, rubbed- क. भू. धा. वि. of उद्+ लिह्- to polish- (लिह्- लेढि-लीढे २ ग. उ. प. to lick, to chew)- शाणेन उल्लीढः- शाणोल्लीढः- तृ. तत्पुरुष स., समरविजयी (समरविजयिन्)- hero of the war- समरः- battle, war, विजयिन्- winner- समरे विजयिन् - समरविजयिन्- स. तत्पुरुष स., हेतिनिहतः- injured by weapons- हेति- पु/स्त्री. लिं- a weapon, missile, निहतः- laid, lodged- हेतिना निहतः- तृ. तत्पुरुष स. & दलितः- torn, injured- both क. भू. धा. वि. of नि+ हन्- to strike- (हन्- हन्ति २ ग. प. प. to kill) & दल्- दलति १ ग. प. प. to split, crack, नागः- an elephant, मदक्षीणः- weak by being in rut- मद- rut, ichors, क्षीणः- weak, lean- क. भू. धा. वि. of क्षि-१, ५ & ९ प. प. क्षयति, क्षिणोति & क्षिणाति- to effect, diminish- मदेन क्षीणः- तृ. तत्पुरुष स., चन्द्रः- the moon, कलाशेषः- small, कला- a small part of anything, शेषः- remainder, part, कलया शेषः- तृ. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., सरितः & श्यानपुलिनाः - both in स्त्री. लिं. प्र. वि. ब. व. of सरित्- river & श्यानपुलिना- श्यान- coagulated, shrunk- क. भू. धा. वि. of श्यै- श्यायते १ ग. आ. प. to be coagulated, shrunk, पुलिन- पु/न. लिं- a sand bank, beach- पुलिनेन श्याना - श्यानपुलिना- - तृ. तत्पुरुष स., बालवनिता- young woman, बाल- young, वनिता- woman- बाला वनिता- वि. पू. प. कर्मधारय स. & सुरतमृदिता- tired after making love- सुरत- सु- अव्यय- good, रत- delighted, sexual union- क. भू. धा. वि. of रम्- रमते १ आ. प. -to rejoice, मृदित- bruised, squeezed- क. भू. धा. वि. of मृद्- मृद्नाति ९ प. प.- सुरतेन मृदिता- तृ. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., नृपाः, नराः & गलितविभवाः- all in पु. लिं. प्र. वि. ब. व. of नृप- King- नृ- a man- नॄन् पाति इति- नृपः- उपपद तत्पुरुष स., नर- a man person & गलितविभवः- गलित- lost, deprived, filtered- क. भू. धा. वि. of गल्- गलति १ ग. प. प. to drop, fall down, disappear, विभवः- wealth, greatness, prosperity- गलितः विभवः- गलितविभवः- विशेषणपूर्वपदकर्मधारय स., शरदि- स्त्री. लिं. स. वि. ए. व. of शरद्- autumn, अर्थिषु- in पु. लिं. स. वि. ब. व. of अर्थिन्- seeker, one who asks, begs, तनिम्ना- in पु. लिं. तृ. वि. ए. व. of तनिमन्- slenderness,

shallow, thin, weak शोभन्ते- वर्त. तृ. पु. ब. व. of शुभ्- शोभते १ ग. आ. प. to be splendid, look beautiful, shine.

**त्वमेव चातकाधारोऽसीति केषां न गोचरः।**
**किमम्भोदवरास्माकं कार्पण्योक्तिं प्रतीक्षसे॥५०॥**

अम्भोदवर, त्वम् एव चातकाधारः असि इति । त्वम् केषाम् न गोचरः (असि)। किम् अस्माकम् कार्पण्योक्तिम् प्रतीक्षसे?
(Said by चातक- a bird that is supposed to live only on raindrops)
'Oh, the best among the clouds! You alone are the sustainer of the Catwalks. You are not anybody else's domain. Why do you keep us waiting for our poor crying?

अम्भोदवर- Oh, the best among the clouds- पु. लिं. सं. वि. ए. व.- अम्भस्- न. लिं.- water, अम्भः ददाति इति- अम्भोदः- उपपद तत्पुरुष स. & अम्भोदस्सु वरः - स.तत्पुरुष, अस्माकम् & केषाम्- both ष. वि. ब. व. of अस्मद्- I, we & कः (किम्)- who, कार्पण्योक्तिम्- स्त्री. लिं. द्वि. वि. ए. व. of कार्पण्योक्तिः- miserable pleading- कार्पण्यम्- न. लिं.- poverty, indigence, pity, उक्तिः- स्त्री. लिं.- expression, speech- कार्पण्ययुक्ता उक्तिः- कार्पण्योक्तिः- लुप्तपद कर्मधारय स, प्रतीक्षसे & असि - वर्त. मध्यम. पु. ए. व. of प्रति+ ईक्ष्- to expect, await- (ईक्ष्- ईक्षते १ आ. प. to see, observe) & अस्- २ ग. प. प. to be, to exist, त्वम्- प्र. वि. ए. व. of युष्मद्- you, चातकाधारः- sustainer or supporter. Chateaus- चातक- a bird which is supposed to live directly on raindrops, आधारः- sustainer, supporter- चातकस्य आधारः- चातकाधारः- ष. तत्पुरुष स. & गोचरः- field , section, domain (गो- पु/स्त्री. लिं- cattle & चर- adjctv- moving, going- कुत्र गौः चरति तद्- गोचरम्- उपपद तत्पुरुष स.)- both पु. लिं. प्र. वि. ए. व., इति- a particle used to report the very word spoken- thus, in this manner, किम्- a particle of interrogation- is it not?, न- no, not, एव- just, mere, only- all अव्ययs

**रे रे चातक सावधान मनसा मित्र क्षणं श्रुयताम्**
**अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।**

**केचिद् वृष्टिभि: आर्द्रयन्ति धरणिं गर्जन्ति केचिद् वृथा**
**यं यं पश्यसि तस्य तस्य पुरत: मा ब्रूहि दीनं वच: ॥५१॥** -

प्रतिरुपम्/ समान शब्दः - धरणिं अथवा वसुधां & ब्रूहि अथवा कुरु

रे मित्र, रे चातक, सावधन मनसा, क्षणम् श्रुयताम् (शृणु )। गगने अम्बोदाः बहवाः सन्ति, अपि सर्वे एतादृशाः न (सन्ति)। केचित् (अम्बोदाः) धरणिं वृष्टिभिः आर्दयन्ति। केचित् वृथा गर्जन्ति । (त्वम्) यम् यम् पश्यसि तस्य तस्य पुरतः दीनम् वचः मा (कुरु) ब्रूहि॥

Oh Chatek, oh my friend, listen carefully for a moment. There are too many clouds in the sky. But not all are alike! Some wet the earth with rain showers. Others just roar in vain! (Therefore) Do not beg to each and every cloud you see there.

*This is an अन्योक्ति. One should discriminate between real and unreal.*

उ.प.-to do & ब्रू-ब्रवीति- सावधन-(adjective)-attentive, heedful, मनसा- न. लि.तृ.वि.ए.व. of मनस्- mind, desire, क्षणम्-instant, moment- (भवान्) श्रुयताम्-श्रु- ५ ग. प. प. ( here आ.प) विध्यर्थ - प्र.पु..ए. व., गगने -न. लि. स. वि. ए. व of गगनम्- Sky, अम्बोदाः - पु. लि. प्र. वि. ब. व. of अम्बुदः –cloud ( अम्बु - न.लिं- water) - अम्बुम् ददाति इति अम्बुदः or अम्बोदः -उपपद तत्पुरुष स., cloud & बहवाः - पु. लि. प्र. वि. ब. व of बहु- much, plentiful, अस्-अस्ति २ ग. प. प.- सन्ति- वर्त. प्र.. पु. ब. वचन, एतादृश् - such, like, of this kind, केचित् -some-पु. लि. प्र. वि. ब. व. of किम्+चित्, वृष्टिभिः- स्त्री.लि. तृ. वि. ब. व. of वृष्टिः -rain, shower, आर्दयन्ति, - १० ग. उ. प. वर्त. प्र.पु.. ब.व. of- आर्द्- to wet, humid & गर्जन्ति- १० ग. प. प. वर्त.प्र.पु of गर्ज्- to roar, thunder, धरणिं, वसुधाम् - both स्त्री. लिं. द्वि. वि. ए. व of धरणि, वसुधा-earth, वृथा- (अव्यय)- in vain, wantonly, - यम् - पु.लि.द्वि. वि. ए.व. of यद्- who, पश्यसि- वर्त. म.पु.. ए. व. of दृश् -पश्यति- to see, look at, तस्य & पुरतः - both पु.लि.षष्ठी वि.ए.व.of तद्- he & पुरस् (अव्यय) before, front, मा- (अव्यय)- a particle of prohibition, कुरु & ब्रूहि- आज्ञार्थ- द्वि.पु.ए. व, of कृ- करोति-कुरुते- ८ ग. ब्रूते- २ ग.उ.प. talk, say, दीन- poor, distressed, वचः - न.लि.प्र. वि.ए.व. of वचस् - speech, word

**शशी दिवसधूसरो गलितयौवना कामिनी**
**सरो विगतवारिजं मुखमनक्षरं स्वाकृते:।**
**प्रभुर्धनपरायण: सततदुर्गत: सज्जनो**
**नृपाङ्गणगत: खलो मनसि सप्त शल्यानि मे॥५६॥**

दिवसधूसरः शशी, गलितयौवना कामिनी, विगतवारिजम् सरः, स्वाकृते: अनक्षरम् मुखम्, धनपरायण:प्रभुः, सततदुर्गत: सज्जनः, नृपाङ्गणगत: खलः (एते) सप्त शल्यानि मे मनसि (सन्ति)॥

A faded moon during day-time, a beautiful woman who has lost her youth, a lake devoid of lotus, an illiterate person with handsome personality, a master devoted to wealth, a good person always in miserable state, a wicked person in the royal court- these seven are the arrows in my heart.

शशी (शशिन्)- moon, दिवसधूसरः- faded (shine less) due to daylight- (दिवस- day, धूसरः - dusky- दिवसे धूसरः - स. तत्पुरुष स.), प्रभुः - master, lord, धनपरायण:- devoted to wealth- (धन- wealth, money, परायण- devoted to -पर- अव्यय- a prefix to verbs and nouns implies; towards, for, अयनम्-adjctv- moving, walking- धनाय परायण:- चतुर्थी तत्पुरुष स.), सज्जनः- noble person, gentleman,- (सत्-good, noble, जन- person), सततदुर्गत:- always in miserable state- (सतत- adjctv- constant, always, eternal, दुर्गत- person gone into misery.अव्यय- bad, hard, difficult, गत- gone- -क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go- सततः दुर्गत:- कर्मधारय स.), खलः - wicked person, नृपाङ्गणगत: -one present in the Royal court- (नृप- king, अङ्गण- courtyard, गत:- gone- नृपस्य अङ्गणम्- नृपाङ्गणम्- ष. तत्पुरुष स. & नृपाङ्गणे गत: -नृपाङ्गणगत: -स. तत्पुरुष स.), all in पु. लिं. प्र. वि. ए. व., कामिनी- lustful or loving lady & गलितयौवना- prime past youth- (गलित- lost, vanished, deprived- क. भू. धा. वि. of गल्-गलति- १ ग. प. प. to drop, fall, यौवना- young woman- गलितम् यौवनम् यस्य सा- बहुव्रीहि स.) -both in स्त्री. लिं. प्र. वि. ए. व., विगतवारिजम्- empty of or without lotus- (विगत- devoid of, gone away- क. भू. धा. वि. of वि+गम्, वारिज- वारि (न. लिं.)- water- वारिणि जायते इति- वारिजम्- lotus- उपपद तत्पुरुष स.)- विगतम् वारिजम् यस्मात् तद् - बहुव्रीहि

स.), मुखम् - face, अनक्षरम्- illiterate- अन् अक्षरम्-नञ्तत्पुरुष स. & सरः (सरस्)- lake- all in -न. लिं. प्र. वि. ए. व., स्वाकृतेः- पु/स्त्री. लिं. ष. वि. ए. व. of स्वाकृति- (सु+आकृति)- good figure, beautiful or handsome- (सु-अव्यय- prefix denotes ; good, pleasant- आकृति- figure), मे (मम)- ष. वि. ए. व. of अस्मद्- I, we, मनसि- न. लि. स. वि. ए. व. of मनस्- mind, heart, सप्त & शल्यानि- न. लि. प्र. वि. ब. व. of सप्तन्-seven & शल्य- dart, arrow

**मौनान्मूकः प्रवचनपटुर्वाचलो जल्पको वा**
**धृष्टः पार्श्वे वसति च सदा दूरतस्त्वप्रगल्भः।**
**क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः**
**सेवाधर्मः परमगहनो योगिनामप्यगम्यः॥५८॥**

पाभे: वाचलो- वातुलो

(सेवकः) मौनात् मूकः (गण्यते)। (यदि) प्रवचनपटुः (तदा) सः वाचलः (वातुलः) जल्पकः वा (भवति)। (यदि सः ) सदा पार्श्वे वसति च धृष्टः (कथ्यते)। (यदि च) दूरतः (वसति) तु अप्रगल्भः (कथ्यते)। (यदि सः) क्षान्त्या (अस्ति तदा) भीरुः (उच्यते) । यदि न सहते प्रायशः न अभिजातः (कथ्यते)। (एषः) सेवाधर्मः परमगहनः (भवति) । (तद्) योगिनाम् अपि अगम्यः (अस्ति)॥

If a servant remains silent, he is called dumb. If he is proficient in speech, then he talks too much or is crazy. If he stays too close, he is called impudent. If he stays at a distance, he is immature. If he is patient, he is called a coward. If he is mostly intolerant, he is not courteous. (Alas!) The duty of a servant is very hard to understand! Even the Yogis do not comprehend it!

मौनात्- न. लिं. पं. वि. ए. व. of मौनम्- silence, मूकः- dumb, speechless, प्रवचनपटुः- proficient in speaking- प्रवचनम्- eloquence, speaking, पटुः- expert, proficient- प्रवचने पटुः- स. तत्पुरुष स., वाचलः- talkative, वातुलः- crazy-headed, mad, जल्पकः- talkative, garrulous, धृष्टः- rude, impudent, अप्रगल्भः- immature, not bold- न प्रगल्भः- अप्रगल्भः- नञ् तत्पुरुष स., अगम्यः- difficult to reach, inconceivable, unapproachable- न गम्यः- अगम्यः- नञ् तत्पुरुष स.- गम्य-(also गमनीय & गन्तव्य)- क. वि. धा. सा. वि. of गम्- गच्छति १ ग.प. प. to go, भीरुः- timid, cowardly, अभिजातः- well born, courteous, सेवाधर्मः- serving duty- सेवा- स्त्री. लिं.- duty,

service, धर्मः- duty, prescribed rule- सेवायाः धर्मः- ष. तत्पुरुष स., परमगहनः- very hard to understand- परम-adjctv- most, greatest, गहनः- impenetrable, hard to understand- परमः गहनः- वि. पू. प. कर्मधारय स.- all in- पु. लिं. प्र. वि. ए. व., पार्श्वे- near, at hand- पु/न. लिं. स. वि. ए. व. of पार्श्व- side, वसति & सहते- both वर्त. प्र. पु. ए. व. of वस्- १ ग. प. प. to live, stay & सह्- १ ग. आ. प. to tolerate, bear, क्षान्त्या- स्त्री. लिं. तृ. वि. ए. व. of क्षान्तिः- patience, forbearance, योगिनाम्- पु. लिं. ष. वि. ब. व. of योगिन्- a saint, an ascetic, वा-or, and, च- and, अपि- even, also, यदि- incise, if, न-no, not, दूरतः- at a distance, far away, तु- on the other hand, but, प्रायशः (प्रायशस्)- perhaps, mostly, possibly & सदा- always, daily -all अव्ययs

**कः लाभो गुणिसङ्गमः किमसुखं प्राज्ञेतरैः सङ्गतिः**
**का हानिः समयच्युतिर्निपुणता का धर्मतत्त्वे रतिः।**
**कः शूरो विजितेन्द्रियःप्रियतमा काऽनुव्रता किं धनं**
**विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम्॥१०4॥**

कः लाभः? गुणिसङ्गमः (लाभः)। किम् असुखम्? प्राज्ञेतरैः सङ्गतिः (असुखम्)। का हानिः? समयच्युतिः (हानिः)। का निपुणता? धर्मतत्त्वे रतिः (निपुणता)। कः शूरः? विजितेन्द्रियः (शूरः)। का प्रियतमा? अनुव्रता (प्रियतमा), किम् धनम्? विद्या (धनम्)। किम् सुखम्? अप्रवासगमनम् (सुखम्)। किम् राज्यम्? आज्ञाफलम् (राज्यम्)॥

What is a positive gain? It is meeting any virtuous people. What is discomfort? It is the company of stupid people. What is a loss? It is the time wasted. What is an expertise? It is the love of principles of 'Dharma'. Who is strong? One, who has control over his sense organs. Who is a beloved? One who is devoted. What is wealth? It is one's knowledge. What is happiness? It is the absence of travelling. What is an authority? It is a positive response to commands.

कः (किम्)- what, which, who, लाभः- gain, accomplishment, गुणिसङ्गमः- a company of virtuous people- गुणिन्- adjctv- virtuous, meritorious, सङ्गमः- meeting- गुणिनाम् सङ्गमः- ष. तत्पुरुष स., शूरः- brave, courageous

& विजितेन्द्रियः- one who has achieved control over his organs of sense- विजित- conquered, won over- क. भू. धा. वि. of वि+ जि- to conquer, win- (जि- जयति १ ग. प. प. to win), इन्द्रियम्- न. लिं- an organ of sense- विजितानि इन्द्रियाणि येन सः- बहुव्रीहि स.- all in पु. लिं. प्र. वि. ए. व., किम्-what, असुखम्- unhappiness- सुखम्- joy, happiness- न सुखम्- नञ् तत्पुरुष स., धनम्- wealth, money, अप्रवासगमनम्- not going on journey- प्रवासः- travel, journey, गमनम्- going- प्रवासाय गमनम्- प्रवासगमनम्- च. तत्पुरुष स.& न प्रवासगमनम्- नञ् तत्पुरुष स., राज्यम्- kingdom, authority, आज्ञाफलम्- obedience to order- आज्ञा- order, फलम्- fruit, result- आज्ञायाः फलम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., प्राज्ञेतरैः- in पु. लिं. तृ. वि. ब. व. प्राज्ञेतरः- a stupid, foolish person- प्राज्ञ- पु. लिं.- wise, intelligent इतर- pronoun- other, another- इतरः प्राज्ञ - प्रादि कर्मधारय स., सङ्गतिः- association, meeting, का (किम्)- what, which, who, हानिः- loss, failure, damage, समयच्युतिः- loss of time, wasting of time- समयः- time, opportunity, च्युतिः- स्त्री. लिं- fall, losing, deprivation- समयस्य च्युतिः- ष. तत्पुरुष स., निपुणता- expertise, excellence- निपुण- adjctv- expert, clever, रतिः- delight, joy, devotion, प्रियतमा- a beloved, wife, अनुव्रता (अनुव्रत- adjctv)- devoted, faithful, attached, विद्या- knowledge, learning- all in स्त्री. लिं. प्र. वि. ए. व., धर्मतत्त्वे- in न. लिं. स. वि. ए. व. धर्मतत्त्वम्- principles of Dharma (prescribed codes of conduct)- धर्मः- prescribed codes of conduct, तत्त्वम्- essence, true fact, essential nature- धर्मस्य तत्त्वम्- ष. तत्पुरुष स.

**लज्जागुणौघजननीं जननीमिव स्वाम्**
**अत्यन्तशुद्धहृदयामनुवर्तमानाम्।**
**तेजस्विनः सुखमसूनपि सन्त्यजन्ति**
**सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम्॥११०॥**

सत्यव्रतव्यसनिनः तेजस्विनः असून् अपि सुखम् सन्त्यजन्ति। लज्जागुणौघजननीं अत्यन्तशुद्धहृदयाम्, अनुवर्तमानाम्, स्वाम् जननीम् इव प्रतिज्ञाम् न पुनः (सन्त्यजन्ति॥

Those vowed to truth are heroes who happily sacrifice their lives (rather than break their sacred vow). They never sacrifice her which

is their flooding source of virtue of modesty, extremely pure hearted, always giving company like one's own mother.

सत्यव्रतव्यसनिनः & तेजस्विनः- both in पु. लिं. प्र. वि. ब. व. of सत्यव्रतव्यसनिन्- सत्यम्- truth, factual, व्रतः/तं- vow, resolve, व्यसनिन्- one intently attached, excessively devoted- सत्यस्य व्रतः= सत्यव्रतः & सत्यव्रतस्य व्यसनिन्- both ष. तत्पुरुष स. & तेजस्विन्- adjctv- brilliant, heroic, dignified- तेजस्- न.लिं.- sharpness, brilliance, heroic luster- वित्/विन्- suffix implies: quality, possession, excellence, असून्- in पु. लिं. द्वि. वि. ब. व. of असुः- breath, life, सन्त्यजन्ति- वर्त. प्र. पु. ब. व. of सं+ त्यज् - to abandon totally- (त्यज्- त्यजति १ ग. प. प. to leave, abandon), लज्जागुणौघजननीम्, अत्यन्तशुद्धहृदयाम्, अनुवर्तमानाम्, स्वाम् जननीम् प्रतिज्ञाम्- all in स्त्री. लिं. द्वि. वि. ए. व. of लज्जागुणौघजननी- flooding source of virtue of modesty- लज्जा- modesty, bashfulness, गुणः/णं- quality, virtue, औघः- flood, जननी- mother, origin, producer- लज्जा + गुणः/णं- वि. पू. प. कर्मधारय स., लज्जागुणस्य औघः & लज्जागुणौघस्य जननी- both ष. तत्पुरुष स., अत्यन्तशुद्धहृदया- extremely pure-hearted- अत्यन्त- adjctv- very much, excessive, absolute, शुद्ध- adjctv- pure, clean- क.भू धा. वि. of शुध्- शुध्यति ४ ग. प. प. to be pure, clean, हृदयम्- heart- अत्यन्त+ शुद्ध- अत्यन्तशुद्ध- वि. उ. प. कर्मधारय स. & अत्यन्तशुद्धम् हृदयम् यस्याः सा- बहुव्रीहि स., अनुवर्तमाना- one which is following every where- अनुवर्तमान- कर्मणि वर्त. का. वा. धा. सा. वि. of अनु+ वृत्- to follow- (वृत्- वर्तते १ ग. आ. प. to be, to exist), स्वा- (स्व) pron.adjctv- one's own, belonging self, जननी- mother, प्रतिज्ञा- promise, vow, अपि- also, even, सुखम्- happily, gladly, न- no, not, पुनः (पुनर्)- again, hand, इव- like, all अव्ययs

# 13. भर्तृहरि लिखित? Bhartṛhari Composed?

While reviewing various works on Bhartṛhari Nītiśataka, we came across many Subhāṣitas that are attributed to Bhartṛhari but we could not verify them as definitely written by him. We have still included them here because of the beauty and meaning of these compositions. They include a variety of subjects.

**उदयति यदि भानुः पश्चिमे दिग्विभागे।**
**प्रचलति यदि मेरुः शीततां याति वह्निः।**
**विकसति यदि पद्मं पर्वताग्रे शिलायां।**
**न चलति खलु वाक्यं सज्जनानां कदाचित्॥**

यदि भानुः पश्चिमे दिग्विभागे उदयति, यदि मेरुः प्रचलति, (यदि) वह्निः शीतताम् याति, यदि पद्मम् पर्वताग्रे शिलायाम् विकसति, (तथापि) सज्जनानाम् वाक्यम् खलु कदाचित् न चलति॥

Even if the Sun rises in the Western part of directions, even if the mount Meru trembles, (even if) the fire gets cold, even if a lotus blooms on the mountain top rock, the word of virtuous (noble) people never changes at all.

यदि- अव्यय- if, in case, whether, भानुः -the Sun, मेरुः -the Mount Meru, वह्निः - the fire, पद्मम्- lotus - all प्र. वि. ए. व., पश्चिमे- in the west, दिग्विभागे, पर्वताग्रे - स. वि. ए. व. of दिग्विभागम् -न. लि. direction (दिशः विभागम्- ष. तत्पुरुष स.-दिश्-स्त्री.लिं-direction, विभागम्-part, portion) and पर्वताग्रं - mountain top (पर्वतस्य अग्रम्- ष. तत्पुरुष स.), उदयति, चलति, प्रचलति, याति, विकसति, all वर्त. प्र. पु. ए. व.of इ- एति -२ ग. प. प. to go, come to, उद्+इ- to rise, spring, चल्- १ ग. प.प. to walk, go, shake, deviate, move, प्र+चल्- to tremble, या- २ ग. प. प. to get, go, become, कस्-कसति १ ग. प. प. to move, approach वि+कस् - to open, bloom, शीतताम्- द्वि. वि. ए. व. of शीतता-coolness, शिलायाम्- स. वि. ए. व. of शिला- rock स्त्री. लिं, सज्जनानाम्- ष. वि. ब. व. of सज्जन (सत्-good, noble +

जनः people) वाक्यम्- sentence, word, खलु - अव्यय-indeed, really, कदा -अव्यय-when, what time, followed by चित् - means 'at one time' or 'at some time'.

**कर्पूरधूलीकलितालवाले**
**कस्तूरिकाकल्पितदोहकश्रीः।**
**हिमांबुकाभैरभिषिच्यमानः**
**प्राञ्चं गुणं मुञ्चति नो पलाण्डुः॥**

कर्पूर-धूली-कलित आलवाले, कस्तूरिका-कल्पित-दोहकश्रीः, हिम-अंबुकाभैः अभिषिच्यमानः, पलाण्डुः (आत्मनः) प्राञ्चम् गुणम् नो मुञ्चति॥

Onion does not lose its foremost quality (i.e. its pungent smell) even if it is mixed in a basin with camphor powder, tended using best quality of musk perfume and sprinkled with drops of dew water

कर्पूर-camphor, धूली- powder, कलित-mixed, seized-क. भू. धा. वि. of कल्-कलते १ ग. आ. प. to hold, bear, carry, आलवाले- in the basin स. वि. ए. व. of आलवाल-trench, basin (कर्पूरस्य धूलिः -ष. तत्पुरुष स.-कर्पूरधूलिना कलितम्-तृ. तत्पुरुष स. & कर्पूरधूलीकलितम् आलवालम्- कर्पूरधूलीकलितालवालम्- कर्मधारय स.), कस्तूरिका- musk, कल्पित-adjctv- arranged, formed, tended- (it is also प्रयोजक क. भू. धा. वि कल्पयति-ते- to prepare, to provide-कल्पते १ ग. आ. प., दोहक- food of milk, श्रीः - suffix means 'the best in the lot'-(कस्तूरिकाया कल्पितम्- तृ. तत्पुरुष स.- कस्तूरिकाकल्पितः दोहकः - कर्मधारय तत्पुरुष स.-कस्तूरिकाकल्पितदोहकेषु श्रीः-कस्तूरिकाकल्पितदोहकश्रीः -स. तत्पुरुष स.), हिम-dew, अंबु-water, हिमस्य अंबु -हिमांबु- ष. तत्पुरुष स. हिमांबुकाभैः-तृ. वि. ब. व. of हिमांबुकाभ- हिमांबुक-drop of dew water- अंबुकानाम् आभः-अंबुकाभः -ष. तत्पुरुष स., अभिषिच्यमानः & पलाण्डुः- प्र. वि. ए. व. of अभिषिच्यमान- sprinkled, watered- वर्त. का. वा. धा. सा. वि. of अभि+सिच्-to sprinkle well-(सिंचति-ते ६ ग. उ. प. to sprinkle, to water) & पलाण्डु- (पु. लिं.)-onion, प्राञ्चम् & गुणम् -द्वि. वि. ए. व. of प्राञ्च्-(प्राच्)-adjctv- foremost, dominant & गुण- quality, characteristic, नो -अव्यय-( न+उ) - no not, मुञ्चति- वर्त. तृ. पु. ए. व. of मुच्- मुंचति-ते ६ ग. उ. प. to loose, set free, to drop,

**क्षमा बलमशक्तानाम् शक्तानाम् भूषणम् क्षमा।**
**क्षमा वशीकृतिर्लोके क्षमया किम् न सिध्यति ॥**

(इह) लोके क्षमा अशक्तानाम् बलम् (भवति)।क्षमा शक्तानाम् भूषणम् (अस्ति)।क्षमा वशीकृतिः (भवति)।(इह लोके) क्षमया किम् न सिध्यति ?

In this world, forgiveness is the strength of the weak people. Forgiveness is an ornament of the mighty. It is an effective way to control others. What cannot be accomplished in this world by forgiveness?

लोके- पु/न. लिं. स. वि. ए. व. of लोक- world, earth, क्षमा- forgiveness, forbearance, patience- स्त्री. लिं. प्र. वि. ए. व., शक्तानाम् & अशक्तानाम्- पु. लिं. ष. वि. ब. व. of शक्त- one who is capable, strong, brave & अशक्त- weak, incapable- न शक्तः - नञ् तत्पुरुष स.- शक्त- क. भू. धा. वि. of शक्- शक्नोति ५ ग. प. प. to be able, competent, बलम्- strength, might, power, भूषणम्- adornment, decoration & किम्- what, which- all in न. लिं. प्र. वि. ए. व., वशीकृतिः- instrument of influencing, control, taming, subduing- स्त्री. लिं. प्र. वि. ए. व.- वश- adjctv- subject to, influenced by, humbled, tamed, कृतिः- action, deed, making- (कृत- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make), वशी+ कृ - च्वि रूप धातु , क्षमया- स्त्री. लिं. तृ. वि. ए. व. of क्षमा- (see above), सिध्यति- वर्त. प्र. पु. ए. व. of सिध्- ४ ग. प. प. to be accomplished, fulfilled न-no, not

**यो न ददाति न भुङ्क्ते सति विभवे नैव तस्य तद् द्रव्यम् ।**
**तृणमयकृत्रिमपुरुषो रक्षति सस्यं यथा परस्यार्थे॥**

यथा तृणमयकृत्रिमपुरुषः परस्य अर्थे सस्यम् रक्षति, (तथा) यः सति विभवे, न ददाति न भुङ्क्ते, तद् द्रव्यम् तस्य न एव (अस्ति)॥

An artificial person made of straw (a scarecrow) protects the crop for the sake of others. Similarly, a person's wealth does not belong to him who does not utilise it or enjoy it.

यथा & (तथा) -अव्यय- as, in that manner & as, in the same manner, तृणम्-grass, मय- adjctv-an affix used to indicate 'made of' or 'full of', कृत्रिम- adjctv- artificial, not real, पुरुषः man, तृणमय- made of straw, कृत्रिमः पुरुषः - कृत्रिमपुरुषः -कर्मधारय स., परस्य & तस्य both- ष. वि. ए. व. of पर- other & तद्-he, she ,it, अर्थे - स. वि. ए. व. of अर्थ- interest, for the sake सस्यम् - crop, रक्षति, भुङ्क्ते & ददाति all प्र. पु. ए. व. of रक्ष् १ ग. प. प. to protect, भुज्-भुनक्ति-भुङ्क्ते ७ ग. उ. प. to eat, enjoy, consume & दा-ददाति-दत्ते ३ ग. उ. प. प. to give, यः - पु. लिं. प्र. वि. ए. व. of यद्- who, which, what, सति- having & विभवे - in wealth, both -स. वि. ए. व. of सत्- क. भू. धा. वि. अस् २ ग. प. प. to be, to have & विभव- wealth, , तद् -that, द्रव्यम्- wealth, एव-अव्यय- exactly, just, alone, only, merely

**स्वायत्तमेकान्तगुणं विधात्रा**
**विनिर्मितं छादनमज्ञतायाः।**
**विशेषतः सर्वविदां समाजे**
**विभूषणं मौनमपण्डितानाम्॥**

अज्ञतायाः, स्वायत्तम् एकान्त-गुणम् छादनम्, विधात्रा विनिर्मितम् (अस्ति)।
अपण्डितानाम्, विशेषतः सर्वविदां समाजे, मौनम् विभूषणम् (भवति)॥

For stupidity, a great cover that remains in one's control has been created by the Creator. (That cover is to keep quiet!) For the ignorant, particularly, in the company of learned people, keeping quiet is indeed an ornament.

अज्ञतायाः- for stupidity- ष. वि. ए. व. of अज्ञता (स्त्री. लिं); स्वायत्तम् , एकान्तगुणम्, छादनम् , विनिर्मितम् - all न. लिं. प्र. वि. ए. व. -स्वायत्तम् - स्व+आयत्तम्, स्व-self, one's own- आयत्त- dependent on -क. भू. धा. वि. of आ+ यत् (यत्-यतते १ ग. आ. प. to strive, attempt, एकान्त- absolute, great, गुणम् - quality, छादनम् - cover, विनिर्मितम्- created- क. भू. धा. वि. of वि+निर्+मा (मा - माति २ ग. प. प. to measure), विधात्रा-by the creator- तृ. वि. ए. व. of विधातृ, अपण्डितानाम्- ष. वि. ब. व. of अपण्डित- stupid, ignorant (न पण्डित - नञ्तत्पुरुष स.), विशेषतः (विशेषतस्)- especially, particularly, सर्वविदाम् -ष. वि. ब. व. of सर्वविद् - all-knowing (सर्वम् वेत्ति

इति - उपपद तत्पुरुष स.), समाजे- स. वि. ए. व. of समाज- group, company, मौनम्-silence, विभूषणम् - decoration, ornament.

**अर्थं सुखं कीर्तिरपीह मा भूत्**
**अनर्थः एवास्तु तथापि धीराः।**
**निजप्रतिज्ञामनुरुध्यमाना**
**महोद्यमाः कर्म समारभन्ते॥**

महोद्यमाः, धीराः निजप्रतिज्ञाम् अनुरुध्यमानाः, इह अर्थम् सुखम् कीर्तिः अपि मा भूत्, अनर्थः एव अस्तु तथापि कर्म समारभन्ते॥

Brave people with great determination during execution of their committed project, continue the work with zeal and determination even if they lose wealth, peace of mind (happiness) and fame.

महोद्यमाः, धीराः & अनुरुध्यमानाः- पु. लिं. प्र. वि. ब. व. of महोद्यम- people of great resolve, determination, महत्-great, big, उद्यमः- a person with resolve, determination- महान् उद्यमः - कर्मधारय स., धीर- brave, strong & अनुरुध्यमान- one who is following, conforming to- वर्त. का. वा. धा. सा. वि. of अनु+ रुध्- (रुध्- रुणद्धि रुंद्धे ७ ग. उ. प to stop, hinder), निजप्रतिज्ञाम्- स्त्री. लिं. द्वि. वि. ए. व. of निजप्रतिज्ञा- self resolve, commitment- निज- self, one's own, प्रतिज्ञा- vow, resolve- निजस्य प्रतिज्ञा- ष. तत्पुरुष स. or निजा प्रतिज्ञा- कर्मधारय स., अर्थम्- wealth, money & सुखम्- happiness, joy- both न. लिं. प्र. वि. ए. व., कीर्तिः- fame, glory- स्त्री. लिं. प्र. वि. ए. व., इह- here, in this place, अपि- also, even, मा- particle of prohibition (rarely negation) usually joined with the imperative- मा भूत्- lest be, that not be, अनर्थः- misfortune, disastrous situation, अस्तु- आज्ञार्थ प्र.. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, कर्म- न. लिं. द्वि. वि. ए. व. of कर्मन्- work, task, duty, specific action, समारभन्ते- वर्त. प्र.. पु. ब. व. of सं+आ+ रभ्- to set about, continue to undertake- (रभ्- रभते १ ग. आ. प. to begin, एव- only, just, so & तथापि- then also, even then- both अव्ययs

**जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं**
**श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम्।**

**संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो**
**ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः॥** वैराग्य शतकम्?

कूर्मः एकः (एव) जातः येन पृथुभुवनभराय पृष्ठम् अर्पितम्। ध्रुवस्य जन्म श्लाघ्यम्, यत्र तेजस्विचक्रम् नियमितम् भ्रमति। अपरे संजातव्यर्थपक्षाः परहितकरणे (ध्रुववत्) न उपरिष्टात् (सन्ति), न च (कूर्मवद्) अधः (सन्ति)। (ते) जन्तवः ब्रह्माण्डोदुम्बरान्तर्मशकवत् जातनष्टाः (भवन्ति)॥

That tortoise (Lord Viṣṇu in कूर्मावतार) is worthy of its birth, having carried on its back the burden of entire earth. (Likewise) Birth of Dhruva is praiseworthy, around whom there is regular circular movement of shining Stars. The rest of the people, whose existence is wasted without doing any good to the others, are neither below (like that tortoise) nor above (like Dhruva). They are ruined at birth itself, like flies inside a fig-fruit, forming their world.

सः- (तद्)- he, कूर्मः- tortoise, एकः- one, alone, जातः- one who is worthy of birth, term of endearment- (जात- क. भू. धा. वि. of जन्- जायते ४ ग. आ. प. to be born)- all in पु. लिं. प्र. वि. ए. व., येन- in पु. लिं. तृ. वि. ए. व. of यद्- who, पृथुभुवनभराय- in पु. लिं. च. वि. ए. व. of पृथुभुवनभरः- one who bears burden of entire earth- पृथु- adjctv- expansive, great, mighty, भुवन- world, earth, भरः- load, burden- पृथु भुवनम्-वि. पू. प. क. धा. स. & पृथुभुवनस्य भरः- ष. तत्पुरुष स., पृष्ठम्- back, rear, surface or upper side, अर्पितम्- given- (अर्पित- प्रयोजक क. भू. धा. वि. of ऋ- अर्पयति- ऋ- ऋच्छति १ ग. प. प. to raise, obtain)- in न. लिं. द्व. वि. ए. व., ध्रुवस्य- in पु. लिं. ष. वि. ए. व. of ध्रुव- the North star- (personified in the mythology as son of Antarpata), जन्म (जन्मन्)- birth, श्लाघ्यम्- praiseworthy- (श्लाघ्य- क. भू. धा. वि. of श्लाघ्- श्लाघ्यते १ ग. आ. प. to praise), नियमितम्- regulated, like down- (नियमित- प्रयोजक क. भू. धा. वि. of नि+ यम्-- नियमयति-ते)- all in न. लिं. प्र. वि. ए. व., तेजस्विचक्रम्- bright shining circle (of stars & planets)- तेजस्विन्- bright, shining, चक्रम्- circle, multitude- तेजस्विनाम् (ग्रहनक्षत्रादीनाम्) चक्रम् ( मण्डलम्)- ष. तत्पुरुष स., भ्रमति- वर्त. प्र. पु. ए. व. of भ्रम्- to go about, roam, परहितकरणे- in न. लिं. स. वि. ए. व. of परहितकरणम्- doing good to others- पर- other, हित- good, beneficial- (क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, cast), करणम्- doing- परस्य हितम्- परहितम्- ष. तत्पुरुष स. & परहितम् करणम्- परहितकरणम्- द्वि.

तत्पुरुष स., ब्रह्माण्डोदुम्बरान्तर्मशकवत्- like a fly inside the world of a fig ब्रह्माण्ड- the universe, world, उदुम्बर- fig fruit, अन्तर्- inside, मशकः- fly, वत्- अव्यय- prefix implies; like, similar to- ब्रह्माण्डः इव उदुम्बरः- ब्रह्माण्डोदुम्बरः- उपमान उ. प. क. स., ब्रह्माण्डोदुम्बरस्य अन्तर्- ब्रह्माण्डोदुम्बरान्तर्- ष. तत्पुरुष स. & ब्रह्माण्डोदुम्बरान्तरे स्थितः मशकः इति- ब्रह्माण्डोदुम्बरान्तर्मशकः- कर्मधारय स., अपरे, संजातव्यर्थपक्षाः, जन्तवः & जातनष्टाः- in पु. लिं. प्र. वि. ब. व. of अपरः- other, someone else, संजातव्यर्थपक्षः- one whose part of existence gone waste संजात- (सं+ जात)- having born, having become, व्यर्थ- adjctv- useless, vain, पक्षः- faction, part, side- संजातः व्यर्थः पक्षः यस्य सः- संजातव्यर्थपक्षः- बहुव्रीहि स., जन्तुः- a creature, living being & जातनष्टः- ruined at birth itself- जातः- born, नष्टः- destroyed, ruined- (क. भू. धा. वि. of क. भू. धा. वि. of नश्- नश्यति- ४ ग. प. प. to be lost)- जातः च नष्टः च यः सः- जातनष्टः- बहुव्रीहि स., यत्र- where, in which place, उपरिष्टात्- as an adverb it means; over, high above, later on, न- no, not, च- and, अधः (अधस्)- below, lower region all अव्ययs

**शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला**
**लक्ष्मीरित्यनुभूयते चिरमनुस्यूते शुभे कर्मणि।**
**विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं**
**मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यताम्॥**

चिरम्-अनुस्यूते शुभे कर्मणि, शुभ्रं सद्म सविभ्रमाः युवतयः, श्वेत-आतपत्र-उज्ज्वला लक्ष्मीः इति अनुभूयते। विच्छिन्ने (कर्मणि लक्ष्मीः), नितराम् अनङ्ग-कलह-क्रीडा-त्रुटत् तन्तुकं मुक्ताजालम् इव झटिति भ्रश्यत् दिशः प्रयाति। दृश्यताम्॥

As a result of well accumulated good deeds, one can experience a shining residence, with graceful women and presence of Goddess of wealth, adorn with a brightly shining umbrella. However, if the works are interrupted, one can certainly see that, within no time, the riches get lost in all directions like beads from a string of pearls, torn off during the strife of a love making couple.

अनुस्यूते, शुभे, कर्मणि & विच्छिन्ने- all in न. लिं. स. वि. ए. व. of अनुस्यूतम्- well accumulated, collected together- अनुस्यूत- क. भू. धा. वि. of अनु+ सिव्- to connect uninterruptedly- (सिव्- सीव्यति ४ ग. प. प. to sew, stitch together), शुभम्- (शुभ- adjctv)- auspicious, good, virtuous, कर्मन्- deed, action, work & विच्छिन्नम्- broken, interrupted, failed- विच्छिन्न- क. भू. धा. वि. of वि+ छिद्- to interrupt, break- (छिद्- छिनत्ति छिन्त्ते ७ ग. उ. प. to break, cut), शुभ्रं (शुभ्र- adjctv)- clean, white, shining, सद्म (सद्मन्)- residence, house, अनङ्गकलहक्रीडात्रुटत्तन्तुकम्- a string torn off during strife of love making couple- अनङ्गः- cupid, God of love, कलहः- quarrel, strife, क्रीडा- play, pass time, त्रुटत्- breaking, tearing off- कर्तरि वर्त. का. वा. धा. सा. वि. of त्रुट्- त्रुट्यति, त्रुटति ४, ६ ग. प. प. to break, tear off, तन्तुकम्- a piece of thread or wire - (तन्तुः- wire, string)- अनङ्गस्य कलहः & अनङ्गकलहस्य क्रीडा- both ष. तत्पुरुष स., अनङ्गकलहक्रीडायाम् त्रुटत्- स. तत्पुरुष स. & अनङ्गकलहक्रीडात्रुटत् तन्तुकम्- वि. पू. प. कर्मधारय स., मुक्ताजालम्- a string of pearls- मुक्ता- a pearl, जालम्- net, assemblage, collection- मुक्तानाम् जालम्- ष. तत्पुरुष स. & भ्रश्यत्- falling or dropping down- वर्त. का. वा. कर्तरि धा. सा. वि. of भ्रंश्- भ्रश्यति ४ ग. प. प. to fall, drop down)- all in न. लिं. प्र. वि. ए. व., सविभ्रमाः & युवतयः- both in स्त्री. लिं. प्र. वि. ब. व. of सविभ्रमा- graceful or beautiful- विभ्रमः- any amorous or sportive action, beauty, grace- विभ्रमेण सहिता- सविभ्रमा- सहबहुव्रीहि स. & युवतिः- a young woman, श्वेतातपत्रोज्ज्वला- one brightly shining with white-umbrella- श्वेत- adjctv- white, आतपत्रम्- an umbrella- (आतपः- heat, sunshine, त्र- suffix implies: protector), उज्ज्वला- (उज्ज्वल- adjctv)- splendid, bright- श्वेतम् आतपत्रम्- वि. पू. प. कर्मधारय स. & श्वेतातपत्रेण उज्ज्वला- तृ तत्पुरुष स. & लक्ष्मीः- Goddess of wealth- Lakshmi- both in स्त्री. लिं. प्र. वि. ए. व., अनुभूयते- कर्मणि प्रयोग प्र. पु. ए. व. of अनु+भू- to experience, to feel- (भू- भवति १ ग. प. प. to be, to exist), प्रयाति- वर्त. प्र. पु. ए. व. of प्र+ या- to go, proceed- (या- याति २ ग. प. प. to go), दिशः- in स्त्री. लिं. पं. वि. ए. व. of दिश्- direction, दृश्यताम्- कर्मणि प्रयोग आज्ञार्थ प्र. पु. ए. व. of दृश्- पश्यति १ ग. प. प. to see, observe- कर्मणि प्रयोग- दृश्यते), चिरम्- adverb- for a long time, इति- a particle used to report very words spoken: thus, so, इव- like, similar to, नितराम्- certainly, wholly, completely, always, झटिति- quickly, at once- all अव्ययs

# References

1. Bhrtruhari Niti and Vairagya Shatak: K.M.Jaglekar and B.R.Joshi, Published by Ramachandra Govind & Son , Mumbai 1900

2. Nītiśatakaam : Verses on Ethics By Narayan Laxmi

3.. The Nîtiśataka Śringâraśataka and Vairâgyaśataka by Purohit, Gopinath, (1896) Publisher:Khemaraj Shrikrisnadas
Bombay -Harvard College Library

4. Moreshvar Ramchandra Kāle *(1902), The Nîtiśataka and Vairâgyaśataka*. Reprinted as *Nīti and Vairāgya Śatakas of Bhartṛhari*, Motilal Banarsidass, Brief commentary in Sanskrit, translation and notes in English.

5. Niti Satakam of Bhartrhari by Swami Paramarthananda
Niti Satakam of Bhartrhari. This is a book on universal values prescribed by Dharma Sastra. Lecture series : Beautifully analysed by Swami Paramarthananda. Transcribed by Sri VLN Prasad.

6. The Sataks of Bhartrihari translated into English: B.Hale Wortham
https://ia801307.us.archive.org/15/items/satakasofbhartri00bharuoft/satakasofbhartri00bharuoft.pdf

7. Wikipedia for multiple topics.

# Appendix

## International Alphabet of Sanskrit Transliteration

### Vowels and codas

| Devanāgarī | Transcription | | Category |
|---|---|---|---|
| अ | a | A | monophthongs |
| आ | ā | Ā | and syllabic liquids |
| इ | i | I | |
| ई | ī | Ī | |
| उ | u | U | |
| ऊ | ū | Ū | |
| ऋ | ṛ | Ṛ | |
| ॠ | ṝ | Ṝ | |
| ऌ | ḷ | Ḷ | |
| ॡ | ḹ | Ḹ | |
| ए | e | E | diphthongs |
| ऐ | ai | Ai | |
| ओ | o | O | |
| औ | au | Au | |
| ं | ṃ | Ṃ | anusvara |
| ः | ḥ | Ḥ | visarga |
| ँ | ˜ | | chandrabindu |
| ऽ | ' | | avagraha |

**Consonants**

| velars | palatals | retroflexes | dentals | labials | **Category** |
|---|---|---|---|---|---|
| क<br>k K | च<br>c C | ट<br>ṭ Ṭ | त<br>t T | प<br>p P | tenuis stops |
| ख<br>kh Kh | छ<br>ch Ch | ठ<br>ṭh Ṭh | थ<br>th Th | फ<br>ph Ph | aspirated stops |
| ग<br>g G | ज<br>j J | ड<br>ḍ Ḍ | द<br>d D | ब<br>b B | voiced stops |
| घ<br>gh Gh | झ<br>jh Jh | ढ<br>ḍh Ḍh | ध<br>dh Dh | भ<br>bh Bh | breathy-voiced stops |
| ङ<br>ṅ Ṅ | ञ<br>ñ Ñ | ण<br>ṇ Ṇ | न<br>n N | म<br>m M | nasal stops |
| ह<br>h H | य<br>y Y | र<br>r R | ल<br>l L | व<br>v V | approximants |
| | श<br>ś Ś | ष<br>ṣ Ṣ | स<br>s S | | sibilants |